केचिदस्मिन् श्लोके द्विधाशब्दस्थाने विना शब्दं पठन्ति 'कथ्यमानाद्रूपभेदाद्विना धात्वर्थसङ्गतिः' इति, तेषामेषोऽर्थः —धात्वर्थस्याधिश्रयणादेः अधिश्रयत्यादिना धातुना या वाच्यतया सङ्गतिः, धातोर्वा अधिश्रयत्यादेरधिश्रयणादिनार्थेन या वाचकत्वेन सङ्गतिः सा कथ्यमानाद्रूपभेदाद्विना। योऽयं भाव्यभवनानुकूलात्मा रूपभेदोऽधिश्रयणादेः कर्तृव्यापारस्य सोऽधिश्रयत्यादिना धातुना कथ्यमानो न भवति। किं तु अधिश्रयणादिरूपेण सोऽभिधीयते। ततश्चान्योत्पादानुकूलात्मा कर्तृव्यापारः धात्वर्थतामतिवर्तते, प्रपद्यते च भावनात्वं प्रत्ययार्थत्वं चेत्यभिप्रायः। अस्मिन् पक्षे सर्वथेत्यादिः विवरणग्रन्थोऽप्येतदनुसारेण व्याख्येयः। एवमधिश्रयत्यादिधात्वन्तरार्थस्यैव कर्तृव्यापारस्य पचतीत्यत्रान्योत्पादानुकूलतया भावनात्वं प्रत्ययार्थत्वं

---

1. इत्यादि (च.)

[1] धातूनामभिधानीयान्कर्तृकर्मसमाश्रयान् ।
[2] लब्धात्मनोऽक्रियारूपान्विशेषान्प्रतिजानते ॥ ४० ॥

[3] यथा श्रयतेश्चुल्लीस्थालीसंयोगविशेषः [4] आसिञ्चतेरासिच्यमानाधार-[5] संयोगविशेषः । एवं सर्वत्र यावत्पचेस्तण्डुलावयवानां [6] विभागाः प्रशिथिलावयव [7] संयोगविभागाः ।

चाभ्युपगम्यवादेनोक्त्वा इदानीं पाकाधिश्रयणादिसाधारणीं धात्वर्थातिरिच्यमानशरीरां भावनां प्रतिपादयितुं धात्वर्थस्वरूपनिरूपणमाह —

धातूनामभिधानीयान् कर्तृकर्मसमाश्रयान् ।
लब्धात्मनोऽक्रियारूपान् विशेषान् प्रतिजानते ॥

अयमभिप्रायः — सिद्धस्वभावा एव गुणविशेषा धात्वर्थाः, न पुनर्व्यापारात्मानः इति । अत्रैषाऽक्षरयोजना — लब्धात्मनः [8] सिद्धस्वभावान् गुणविशेषान् अक्रिया-रूपान् धातूनामभिधानीयान् अभिधेयान् प्रतिजानते विद्वांसः । ते पुनर्गुणविशेषाः धात्वभिधेयाः किमाश्रया इत्यपेक्षायामुक्तम् — **कर्तृकर्मसमाश्रयानिति** ।

कर्तृस्थाः केचिद्धात्वर्थाः, केचित्तु कर्मस्था इति । एतदेव स्पष्टीकरोति — **यथा श्रयतेश्चुल्लीस्थालीसंयोगविशेष आसिञ्चतेरासिच्यमानाधारसंयोगविशेषः एवं सर्वत्र यावत्, पचेस्तण्डुलावयवानां विभागाः प्रशिथिलावयवसंयोगविभागाः** इति ।

1. अथवा (ख, ग) ; अपि च (ङ.)
2. लब्धात्मनः क्रिया (ग, घ.)
3. यथाधिश्रयतेः (ख, ग.)
4. आसिञ्चतेरपि सिच्य (क, ख.)
5. संयोगभेदः (क, ग.) ; संयोगविभागभेदः (ख.)
6. विभागः (ग, घ, ङ.)
7. संयोगा वा (क.) ; संयोगो वा (ग, घ, ङ.)
8. स्वभावान् विशेषान् गुणविशेषान् (छ.)

उदासीनत्वविच्छेदलक्ष्यं [1] धात्वर्थकारणम् ।
स्पन्दव्यापारपर्यायं [2] करोत्यर्थं प्रचक्षते ॥ ४१ ॥

अस्यायमर्थः — चुल्लीस्थाल्योर्यः संयोगविशेषः कर्माधिकरणयोर्व्यासज्य वर्तमानः सोऽधिश्रयतेः धातोरर्थः । आसिञ्चतेः पुनः आसिच्यमानस्योदकस्य तदाधारेण स्थाल्यादिना यः संयोगः सोऽर्थः । एवं सर्वत्र यावद्वाच्यं द्रष्टव्यम् । पचतेस्तु धातोस्तण्डुलावयवविभागाः प्रशिथिलावयवसंयोगा वा अवयवस्था अपि तद्वारेणावयवितण्डुलसंबद्धाः कर्मस्था अभिधेयाः । एवं यजतीत्यादिष्वप्यूह्यम् ।

इदानीं उक्तलक्षणधात्वर्थवैलक्षण्येन भावनास्वरूपं निरूपयति—

उदासीनत्वविच्छेदलक्ष्यं धात्वर्थकारणम् ।
स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते ॥

अयमाशयः — धात्वभिधेयगुणविशेषवैलक्षण्येन व्यापारात्मा करोत्यर्थः प्रत्यक्षेणावसीयते इति । इदानीमक्षरानुलोम्यं प्रदर्श्यते — उदासीनत्वविच्छेदेनौदासीन्यप्रच्युत्या लक्ष्यं निरूप्यमाणाकरं धात्वर्थकारणं धात्वर्थस्य हेतुभूतं तत एव तस्माद् भिन्नं स्पन्दव्यापारशब्दाभ्यां पर्यायेणाभिधीयमानं करोत्यर्थं प्रचक्षते विचक्षणा इति ।

---

1. लक्षणं त्वर्थकारणम् (ङ.)
2. पर्यायः (ख.)

[1]तथाहि—अधिश्रयति [2]उदकमासिञ्चति पचति पठतीति वा अधिश्रयणादिसंयोगभेदेभ्यो [3] व्यापारात्मको भेदेन करोति स्पन्दते चेष्टते व्याप्रियते इति व्यापाररूपमध्यक्ष्यते [4] । [5]न चैष [6]तज्जन्यत्वाभिमतविशेषालम्बनः प्रत्ययः, यतः—

व्यापारबुद्ध्युपजनो न संयोगविभागयोः ।
सतोरपि हि चेष्टित्वा विरामं समुपागते ॥ ४२ ॥

एतदेव प्रपञ्चयति — तथाहि- अधिश्रयत्युदकमासिञ्चति पचति पठतीति वाधिश्रयणादिसंयोगभेदेभ्यो व्यापारात्मको भेदेन करोति स्पन्दते चेष्टते व्याप्रियते इति व्यापाररूपमध्यक्ष्यते इति । गुणविशेषेभ्यो धात्वर्थेभ्यो भेदेन [7]व्यापारात्मा करोत्यर्थः पचति पठति गच्छतीति प्रत्यक्षेणानुभूयते इत्यभिप्रायः ।

ननु एष प्रत्ययः तज्जन्यत्वाभिमतसंयोगविभागालम्बन इत्युक्तं पुरस्तादित्याशङ्क्याह —

न चैष तज्जन्यत्वाभिमतविशेषालम्बनः प्रत्ययः, यतः —
व्यापारबुद्ध्युपजनो न संयोगविभागयोः ।
सतोरपि हि चेष्टित्वा विरामं समुपागते ॥

---

1. यथा हि स्थाली अधि (ङ.)
2. सिञ्चति पठतीति (क, ख.); सिञ्चति पचति चेति (ग, घ.)
3. भेदेभ्यो भेदेन करोति (क, ख.); भेदेभ्योऽव्यापारात्मकेभ्यो भेदेन (ग, घ, ङ.)
4. मवेक्ष्यते (ग, घ, ङ.)
5. न वैषः (क, ख.)
6. जन्याभिमत (ग, घ, ङ.); मतगुणविशेषालम्बनः (क, ख.); मतसंयोगविभागालम्बन एव प्रत्ययः (ग, घ, ङ.)
7. अव्यापारात्मकेभ्यो भेदेन (छ.)

[1] **न चलित्वा [2] स्थिते क्रियाप्रभवपूर्वोत्तरदेशविभाग [3] संयोगाभावः, तदालम्बनो व्यापारप्रत्ययो न जातु विरमेत् ।**

अयमाशयः — न चलतीति व्यापारप्रत्ययः तज्जन्यत्वाभिमतसंयोगविभागमात्रालम्बनो भवितुमर्हति, चलित्वा स्थितेऽपि देवदत्ते तद्भावप्रसङ्गात् । संयोगविभागयोस्तत्रापि भावात् । न चलित्वा स्थिते चलतीति प्रत्ययोऽस्ति । तस्मान्नैष संयोगविभागमात्रालम्बनः, किन्तु तद्धेतुभूतव्यापारालम्बन एवेति । अत्रैषाक्षरयोजना — सतोरपि संयोगविभागयोः व्यापारबुद्धेश्चलतीत्येवंरूपाया उपजन उत्पत्तिर्नास्ति । **क्वेदं दृष्टं** इत्यपेक्षायामुक्तं **— चेष्टित्वा** चेष्टां कृत्वा विराममवसानं समुपागते प्राप्ते देवदत्तादाविति । अतः प्रागपि न तदालम्बनो भवितुमर्हतीति वाक्यशेषः । अस्यैवार्थस्य स्पष्टीकरणायाह — **न चलित्वा स्थिते क्रियाप्रभवपूर्वोत्तरदेशविभागसंयोगाभावस्तदालम्बनो व्यापारप्रत्ययो न जातु विरमेदिति ।**

अयमर्थः **—** क्रियाप्रभवौ यौ पूर्वोत्तरदेशसंयोगविभागौ न तयोश्चलित्वा [4] स्थितेऽप्यभावः । किं तु भाव एव । अतः तदालम्बनोऽभ्युपगम्यमानो व्यापारप्रत्ययो न कदाचिदपि विरामं गच्छेत् । गच्छति च विरामं चलित्वा स्थिते चलतीति प्रत्ययः । यदप्येतद्दोषपरिजिहीर्षयोक्तम् 'अच्छिन्नोत्पत्तयो देशविभागत्यागसंगमाः' इति ।

---

1. न हि चलित्वा (ग, घ, ङ.)
2. स्थितस्य (ख, ग, घ, ङ.)
3. संयोगाभावः, अतः तदा (ख, ग, घ, ङ.)
4. स्थितेरप्यभावः (छ.)

[1] विभागेन समुच्छेदात्संयोगप्रचयः कुतः ।
भविष्यद्वृत्तिसंयोगविभागाध्यक्षता कथम् ॥ ४३ ॥

अत्राह —

विभागेन समुच्छेदात्संयोगप्रचयः कुतः ।
भविष्यद्वृत्तिसंयोगविभागाध्यक्षता कथम् ॥

अयमाशयः — न संयोगप्रचयः क्वचिदपि संभवति, पूर्वोत्तरसंयोगयोः सहवृत्त्यसंभवात् । तदभावे प्रचयानुपपत्तेः । कथं पुनः पूर्वोत्तरसंयोगयोः साहित्याभावः? पूर्वविभागेन विनोत्तरसंयोगोत्पत्त्यनुपपत्तेः, विभागेन च पूर्वसंयोगस्य समुच्छेदादुत्तरसंयोगस्य प्राक्तनविभागसमुच्छिन्नसंयोगेन न साहित्यं संभवति । अतो न संयोगप्रचयः [2] ।

ननु संयोगसमुच्छेदात् कोऽन्यो विभागो नाम? स एव खलु सन् [3] । नह्यनयोर्भेदमुपलभामहे । सत्यपि वानयार्भेदे पौर्वापर्यं कुतोऽवसीयते पूर्वं विभागः पश्चात् संयोगसमुच्छेद इति? असति पौर्वापर्ये भेदे च विभागेन समुच्छेदादिति कथं तयोर्हेतुफलभावाभिधानमिति? अत्रोच्यते — क्रियाजन्याद्विभागात् पूर्वसंयोगसमुच्छेद [4] उत्तरदेशसंयोग इत्येवं तावत् प्रक्रिया । न च संयोगसमुच्छेदविभागयोरेकत्वम्, विभागस्यापि संयोगवद्भावान्तरत्वात् । संयोगाभावव्यतिरेकेण विभागो नामान्यो भावो नोपलभ्यत इति चेन्न, संयोगेऽपि तुल्यत्वात् । सोऽपि हि विभागाभावव्यतिरेकेण नोपलभ्यत इति वदन्न दण्डैः पराणुद्यते । संयोगविनाशादन्य एव विभागः तद्धेतुभूतः । यच्चोक्तमनयोः पौर्वापर्यं नानुभूयत इति, सत्यं, अतिसूक्ष्मत्वात् क्षणभेदस्यानुभवाभावः

---

1. अत्राह — विभागेन समुच्छेदादिति (च.)
2. प्रचयो न हि (ग, घ, ङ.)
3. सः (छ.)
4. उत्तरसंयोगः (छ.)

[1-2] **यदप्यविच्छिन्नोत्पाददेशसंयोगविभागप्रचयालम्बन** [3] **इति,**

सुकुमारोत्पलपत्रशतच्छेदादिष्विवेति सन्तोष्टव्यम्। अथवा संयोग(नाश) एव विभागो नान्यस्तथापि तत्पूर्वक एवोत्तरसंयोग इति विभागव्यवहितत्वान्न पूर्वोत्तरयोः संयोगयोः साहित्यम्। अतो न तत्प्रचयः। ननु पूर्वविभागोत्तरसंयोगयोर्यौगपद्यं विद्यते। न हि तयोः क्षणभेदे प्रमाणमस्ति। न चानयोः कार्यकारणभावः सिद्धः, येन तद्बलात् पूर्वापरकालसंबन्धोऽवधार्येत। अन्वयव्यतिरेकौ चानयोरनवधारितपौर्वापर्ययोर्न कार्यकारणभावं प्रमातुं शक्नुतः, सव्यदक्षिणविषाणान्वयव्यतिरेकवत्। सत्यपि कार्यकारणभावे क्रमपूर्वं यौगपद्यं विद्यते। तस्मात् पूर्वविभागोत्तरसंयोगयोः साहित्यं विद्यत इति चेत्, उच्यते— भवतु तयोः साहित्यम्। किमायातं प्रकृते? तयोः प्रत्यय-विषयत्वं स्यादिति चेन्न, चलित्वा स्थितेऽपि प्रसङ्ग इत्युक्तोत्तरत्वात्। एतेन विभागप्रचयस्यापि चलतिप्रत्ययविषयत्वं प्रत्युक्तम्, चलित्वा स्थितेऽपि तद्भावात्। अतो विभागप्रचयस्य केवलस्यैव संयोगसहितस्य वा चलित्वा स्थितेऽपि भावात् संयोगप्रचयस्य विभागेन समुच्छेदात् स्वयमभावान्न चलतिप्रत्ययस्य विषयतेति स्थितम्।

ननु पूर्वोत्तरसंयोगानामसहभावेऽपि एकाश्रयवृत्तितया प्रचलिताः सन्तः चलतिबुद्धिविषया भविष्यन्तीति एषा शङ्का अपाकृता भविष्यद्वृत्तीत्यादिश्लोकोत्तरार्धेन। कथम्? एवं हि ब्रुवाणेन भविष्यतामपि संयोगविभागानां वर्तमानैः सह प्रत्यक्ष-विषयतोक्ता स्यात्। न चैतद्युक्तम्, प्रत्यक्षस्य वर्तमानमात्रविषयत्वादिति।

अत्राक्षरानुलोम्यं प्रदर्श्यते — भविष्यद्वृत्तयः भविष्यत्कालसंबन्धिनो ये संयोगविभागास्तेषामध्यक्षता प्रत्यर्थि(क्ष)ता कथं? कथंचिदपि नोपपद्यत इति। इदानीमस्यार्थस्य स्पष्टीकरणायाह —**यदप्यविच्छिन्नोत्पादसंयोगप्रचयालम्बन इति,**

---

1. यद्यप्यवि (क, ग, घ, ङ.)
2. उत्पादसंयोग (क.)
3. प्रचयालम्बनमिति (ख.)

तदपि न सम्यक् । [1]नह्युत्तरसंयोगः पूर्वविभागादृते । न [2]विभागः संयोगेन [3]सहैकत्र । [4]तद्विभागोच्छेदात्कुतस्तत्प्रचयः?

[5]अच्छिन्नोत्पादश्च [6]नियोगभाव्युत्तरसमवेतता [7]वर्तमानानां । तेषु वर्तमानानागतेषु[8] तदविषयं कथमिन्द्रियं धियं जनयेत्?

तदपि न सम्यगिति । अनेन ग्रन्थेन श्लोकव्यावर्त्यामाशङ्कां निदर्श्य तन्निराकरणं प्रतिजानीते । तत्र हेतुमाह—**नह्युत्तरसंयोगः पूर्वविभागादृते । न विभागः संयोगेन सहैकत्र । तद्विभागोच्छेदात् संयोगस्य कुतस्तत्प्रचय** इति ।

अयमर्थः — न तावत् पूर्वदेशविभागमन्तरेणोत्तरदेशसंयोगः संभवति, किमतो यद्येवमित्याशङ्क्योक्तं—'न विभागः संयोगेन सहैकत्र' इति । उत्तरदेशसंयोगहेतुभूतो विभागः पूर्वसंयोगेन सहैकत्र क्षणे न वर्तते । अत्र हेतूक्तिः— [9]तद्विभागोच्छेदात् संयोगस्येति । उत्तरसंयोगहेतुभूतेन विभागेन पूर्वसंयोगस्योच्छेदात् तत्र कुतस्तत्-प्रचयः? तस्य संयोगस्य प्रचयः कुतः? न कथञ्चिदप्युपपद्यते संयोगप्रचय इत्यर्थः ।.

एवं श्लोकपूर्वार्धं व्याख्यायेदानीं उत्तरार्धं व्याचष्टे—**अच्छिन्नोत्पादश्च नियोगभाव्युत्तरसमवेतता वर्तमानानां । तेषु वर्तमानानागतेषु तदविषयं कथं इन्द्रियं धियं जनयेदिति** ।

---

1. उत्तरदेश (ग, घ, ङ.)
2. विभागेन संयोगेन (क.); न च विभागः संयोगेन (ग, घ.)
3. सहैव वा (ग, घ, ङ.)
4. संयोगस्य कुतस्तत्प्रचयः (क.); तद्विभागेनोच्छेदात् कुतस्तत्प्रचयः (ग, घ, ङ.)
5. अविच्छिन्नो (क, ख, ग, घ, ङ.)
6. नियोगभवाप्युत्तर (क.); नियोगभवोऽपि (ख); नियोगभाव्युत्तरकालानां (ग, घ, ङ.)
7. स वर्तमानानां (ग, घ, ङ.)
8. गतेषु कथमिन्द्रियं (ग, घ, ङ.); तत्र वर्तमानां धियं जनयेत् (ख.); तत्र वर्तमानां धियन्तु ...... (क.)
9. तद्विभागेनोच्छेदात् (छ.)

मनोऽपि चागणितकुशलस्य [1]नैवमर्थम् ।

[2]अपि च–स्थाणौ पूर्वोत्तरश्येनाभ्यां[3] संयोगविभागाभ्यां [4]व्यापारधीः स्यात् ।

अस्यार्थः — निरस्ते साहित्ये अच्छिन्नोत्पादवाचा वर्तमानानां [5]संयोगादीनां उत्तरकालेऽवश्यं भाविभिः संयोगैरेकस्मिन्नाश्रये समवायो वाच्यः । ततश्चानागतैः संभूय वर्तमानाः संयोगविभागाः चलतिप्रत्ययगोचरा उपेताः स्युः । तच्चानुपपन्नम्, इन्द्रियस्य वर्तमानमात्रविषयत्वात् अनागतविषयबुद्ध्युत्पादकत्वानुपपत्तेरिति ।

ननु मा भूत् बाह्यमिन्द्रियमनागतविषयावगाहि, मनस्तु भविष्यतीत्याशङ्क्याह—**मनोऽपि चागणितकुशलस्य नैवमर्थमिति ।**

गणितशब्देन मानसोऽभ्यासो योगोऽभिधीयते । तत्कुशलमस्य [6]मनः अनागतादिविषयमपि भवति । यः पुनरयोगकुशलस्तस्य मनो नैवंजातीयकमर्थमवगमयितुमलं, बाह्येन्द्रियापेक्षप्रवृत्तित्वादिति । अथवा गणितकुशलो दैवज्ञः । अगणितकुशलोऽदैवज्ञः इति । इतोऽपि न संयोगविभागमात्रालम्बनश्चलतिप्रत्ययः इत्याह — **अपि च स्थाणौ पूर्वोत्तरश्येनाभ्यां संयोगविभागाभ्यां व्यापारधीः स्यादिति** । स्थाणावपि श्येनद्वयसंयोगविभागवति चलतिप्रत्ययप्रसङ्गः ।

---

1. नैव समर्थम् (ग, घ, ङ.)
2. नैवमर्थम्, अपि च—अनयोर्मध्येऽयं भागोऽधिकं दृश्यते (ग, घ, ङ.) मातृकासु — 'यथैकादिक्रमेण गणयतो विंशत्यादिषु विंशत्यादिज्ञानं भवति, नागणयतः । तद्वदिह संयोगविभागान्गणयतः चलतीति बुद्धिः स्यान्नागणयतः ।'
3. श्येननिबन्धनाभ्यां (ग, घ, ङ.)
4. व्यापारगीः (क.)
5. संयोगानां (छ.)
6. मनोगतादि (छ.)

आधारदेशसंयोगविभागाभ्यां सेति[1] च न युक्तम्। तथाहि—

जलावयवसंयोगविभागौ स्थिरमूर्तिषु।
जलाधारेषु मत्स्येषु व्यापारप्रत्ययाद्विना ॥ ४४ ॥

प्रतीतं हि जलं देशो मत्स्यानाम्, न स्थाणोरिव श्येनो न देशः।

ननु आधारसंयोगविभागाभ्यां व्यापारधीः [2]संभवति, न संयोगविभागमात्रेण। न च स्थाणोराधारसंयोगविभागौ स्त इत्याशङ्क्याह— **आधारदेशसंयोगविभागाभ्यां सेति च न युक्तमिति।** सा व्यापारधीराधारदेशेन(यौ) संयोगविभागौ ताभ्यामेव भवतीत्येतन्न युक्तमित्यर्थः। एतदुपपादयति–**तथाहि**—

जलावयवसंयोगविभागौ स्थिरमूर्तिषु।
जलाधारेषु मत्स्येषु व्यापारप्रत्ययाद्विना ॥

अयमर्थः— आधारदेशसंयोगविभागयोः सतोरपि जलाधारेषु मत्स्येषु स्थिरमूर्तिषु व्यापारप्रत्ययो न दृष्टः। तस्मान्नैष तदालम्बन इति।

अत्रैषाक्षरयोजना— जलेन सह स्वावयवानां यौ संयोगविभागौ स्थिरमूर्तिषु निश्चलशरीरेषु मत्स्येषु तौ व्यापारप्रत्ययाद्विना दृष्टाविति। एतदेव व्यनक्ति— **प्रतीतं हि जलं देशो मत्स्यानां, न स्थाणोरिव श्येनो न देशः।**

---

1. सेति न युक्तम् (क, ख.); सेति चेत्, तदयुक्तम् (ग, घ, ङ.)
2. भवति (छ.)

[1] तदवयवसंयोगविभागसद्भावेऽपि तेषु महत्त्वादकम्पनीयेषु बलवद्विधारकप्रयत्न-विधृतात्मसु[2] न [3]क्रियावत्त्वाभ्युपगमः। तस्मान्न तन्निबन्धनः ।

नभसस्त्वप्रत्यक्षत्वात् तद्वृत्त्योः संयोगविभागयोर्दुर्लभा प्रत्यक्षता ।

तदवयवसंयोगविभागसद्भावेऽपि तेषु महत्त्वादकम्पनीयेषु बलवद्विधारकप्रयत्न-विधृतात्मसु न [4]क्रियावत्त्वाभ्युपगमः। तस्मान्न तन्निबन्धन इति ।

अयमर्थः — यथा स्थाणोः श्येनो न देशो भवति, प्रसिद्ध्यभावात्, न तथा जलं मत्स्यानां न देशः, किन्तु देश एव, प्रसिद्धेः। तथाहि 'जले मत्स्याः' 'मत्स्यानां जलं देशः' इति प्रतियन्ति लौकिकाः। ततश्च [5]देशभूतजलावयवसंयोगवत्स्वपि मत्स्येषु महत्त्वात् कम्पयितुमयोग्येषु बलवतो जलौघादेर्विधारकेण प्रयत्नेन विधृतात्मसु उपष्टब्धशरीरेषु न क्रियावत्त्वावगतिरस्ति । तस्मान्नाधारदेशसंयोगविभागमात्रालम्बनश्चलतिप्रत्ययः ।

ननु पदार्थानामाकाशं देश इत्युक्तं अवकाशदानात्, तत्संयोगविभागाश्च स्थिरमूर्तिषु मत्स्येषु न सन्ति। अतो न तत्र क्रियावत्त्वावगमप्रसङ्ग इत्याशङ्क्याह— **नभसस्त्वप्रत्यक्षत्वात् तद्वृत्त्योः संयोगविभागयोः दुर्लभा प्रत्यक्षतेति ।**

अस्यायमर्थः — आकाशस्याप्रत्यक्षत्वात्तदाश्रितयोः संयोगविभागयोः प्रत्यक्षता नोपपद्यते। कथं पुनराकाशस्याप्रत्यक्षता? उच्यते — न तावच्चाक्षुषप्रत्यक्षगोचरत्वम् अरूपत्वात्। रूपवत्त्वे स्पर्शवत्त्वस्यापि प्रसङ्गात् । तस्य चाभावात् । अत एव न त्वगिन्द्रिय-ग्राह्यत्वम् । न चेन्द्रियान्तरगोचरत्वं, प्रमाणाभावात् । न चेन्द्रियान्तरगोचरत्वम्,

---

1. तदवयवानां (क.) ; तदवयवानां च (ग, घ, ङ.)
2. नीयेषु प्रयत्नविधृता (क.)
3. क्रियावगमः (ग, घ, ङ.) ; नैष (ख, ग, घ, ङ.)
4. क्रियावत्त्वावगमः (छ.)
5. हेतुभूत (च.)

तत्संयोगविभागयोश्चाक्षुषत्वे उपयुज्यते । किं पुनराकाशे प्रमाणम्? अनुमानमिति केचित् । शब्दः कश्चिद्गुणविशेषो भवितुमर्हति, नियमेनैकेन्द्रियग्राह्यत्वात्, रूपादिवत् । यश्च तस्य [1] गुणी स आकाश इति ।

अपरे तु आकाशस्य मनोमात्रगोचरत्वं वर्णयन्ति । सर्वथापि न चाक्षुषप्रत्यक्षगोचरत्वम् ।

ननु चाक्षुषत्वमपि कैश्चिदाकाशस्येष्टम् । सत्यमिष्टं, न तु युक्तं प्रमाणाभावात्, पूर्वोक्तविरोधाच्च । यद्यपि तद्युक्तं तथापि अप्रत्यक्षपक्षमङ्गीकृत्यैतदाचार्येणोक्तमित्यनवद्यम् ।

नन्वाश्रयाग्राहकेणापि इन्द्रियेणाश्रितं किञ्चिद् गृह्यमाणं दृश्यते—यथा शब्दगन्धादि । (एवं) प्रत्यक्षानाश्रितयोरपि संयोगविभागयोः प्रत्यक्षता स्यादितिचेत्, नैतत् सारम् । तत्र हि विस्पष्टं शब्दादिविज्ञानस्य प्रत्यक्षत्वमिति गत्यन्तराभावात् अप्रत्यक्षाश्रितस्यापि प्रत्यक्षयोग्यता कल्प्यते । इह तु चलतिप्रत्ययस्याप्रत्यक्षता(क्षा)काशसंयोगविभागव्यतिरिक्तेति (क्त)विषयत्वेनापि गतिः संभवति । अथवा एतद्दोषपरिहारार्थं सविशेषणोऽत्र हेतुः प्रयुज्यते—संयोगविभागावप्रत्यक्षावेव, वायुवनस्पतिसंयोगादिवदिति । न चैवं सति अनैकान्तिकत्वं, संयोगविभागयोरप्रत्यक्षाश्रितयोः क्वचिदपि प्रत्यक्षानुपलब्धेरिति ।

---

1. गुणी आकाश इति (छ.)

न च [1] वियद्विततालोकनिबन्धनः, सन्तमसे झटिति [2] विद्युति क्रियाप्रत्ययात् ।

तस्मादस्ति [3–4] धातूपादानतदाहितविशेषातिरिक्तात्मा [5] क्रियापदार्थो भावनापर्यायः ।

ननु [7] मा भूतामाकाशसंयोगविभागौ चलतिप्रत्यक्षविषयौ। वियति विस्तीर्णे(र्णः) आलोकनिवह(हः)प्रभासमूह(हः)तदवयवसंयोगविभागविषयः [8] चलतिप्रत्ययो भविष्यतीत्याशङ्क्याह—**न च वियद्विततालोकनिबन्धनः, सन्तमसे झटिति विद्युति क्रियाप्रत्ययादिति ।**

अयमर्थः — तमसा व्याप्ते व्योमनि स्फुरन्त्यां विद्युति झटिति चलतीतिप्रत्ययः प्रादुर्भवति। न च तस्यालोकनिवहावयवसंयोगविभागालम्बनत्वं शक्यते निरूपयितुम्, अग्न्याद्यालोकस्य तदानीं तत्राभावात्। तदेतत् सन्तमसग्रहणेन दर्शितम्। न च विद्युदालोकनिवहसंयोगविभागालम्बनो विद्युच्चलतीति प्रत्ययः, [9] वैद्युतस्यालोकस्य चलत्याश्रयात् प्रथग्भूतस्य प्रसारितस्यास्यामवस्थायामभावात्। तदेतद् झटितिग्रहणेन दर्शितम्।

इदानीं धात्वर्थाद् भावनाया भेदं [10] प्रतिपादयितुमुपसंहरति — **तस्मादस्ति धातूपादानतदाहितविशेषातिरिक्तात्मा क्रियापदार्थो भावनापर्याय इति ।**

---

1. विततालोकावयविनिवहावयविनिबन्धनत्वं (ग, घ, ङ.)
2. प्रतिपत्तिक्रिया ; विच्छित्तिक्रिया (ख.)
3. धातूरूपक्रियापदार्थो (क.)
4. उपात्त तदाहित (ग, घ, ङ.)
5. अतिरिच्यमानात्मा (ग, घ, ङ.)
6. भावनापरपर्यायः (ख.)
7. मा आकाश (छ.)
8. चलतिप्रत्ययविषयो (च.)
9. आलोकनिवहस्य (छ.)
10. प्रतिपादितं (छ.)

नन्वेवं भावनातो [1] धात्वर्थनिष्पत्तिः, [2] ततः फलस्येति कथं तन्निष्पाद्यो धात्वर्थः तस्याः [3] करणं? [4] स्वर्गादि वातत्साध्यं कर्म?

अयमर्थः — तस्मात्-उक्तहेतुतः धातूपादानात् धात्वर्थात्-तदाहितविशेषात्-तेन क्रियापदार्थेनाहितादुपजनिताद् गुणविशेषादतिरिच्यमानात्मा क्रियारूपः—पूर्वापरीभूतात्मा पदार्थो भावनाभिधानश्चलत्यादिप्रत्ययविषय आख्यातप्रत्ययस्य चाभिधेयो विद्यत इति। कथं [5] पुनररूपा क्रिया चक्षुर्गोचरा स्यात्? रूपिद्रव्याश्रितत्वादिति वदामः। तत्र पुनः पूर्ववादी चोदयति—**नन्वेवं भावनातो धात्वर्थनिष्पत्तिः, ततः फलस्येति कथं तन्निष्पाद्यो धात्वर्थस्तस्याः करणं, स्वर्गादि वातत्साध्यं कर्मेति।**

अयमभिप्रायः — उपवर्णितन्यायेन भावनानिष्पाद्ये धात्वर्थेऽभ्युपगम्यमाने तस्य भावनायां करणत्वं न संभवति, तन्निष्पाद्यत्वादेव। न हि येन यन्निष्पाद्यते तदेव तस्य साधनं भवितुं शक्नोति। न चैवं सति स्वर्गादेर्भावनाकर्मत्वमपि संभवति, भावनानिष्पाद्यधात्वर्थसाध्यत्वेन भावनासाध्यत्वाभावात्। अतो यागादेर्भावनाकरणत्वं स्वर्गादेश्च भावनाकर्मत्वमिष्टं न सिद्ध्यतीति तात्पर्यम्।

इदानीमक्षरानुलोम्यं प्रदर्श्यते — एवं — पूर्वोक्तेन प्रकारेण, भावनातो धात्वर्थस्य निष्पत्तिः, ततो — धात्वर्थात्स्वर्गादेः फलस्य निष्पत्तिरित्यतः तन्निष्पाद्यः — तया भावनया निष्पाद्यो धात्वर्थः तस्या — भावनायाः कथं करणं स्यात्? न कथंचिदपि स्यादिति भावनातो धात्वर्थनिष्पत्त्यङ्गीकरणात् प्रसक्तोऽयं दोषः। अतत्साध्यं — तया

---

1. धात्वर्थस्य (ख, ग, घ, ङ.)
2. ततश्च (ग, घ, ङ.)
3. तस्यां (ग, घ, ङ.)
4. स्वर्गादि वा तत्साध्यं (च, छ.); स्वर्गादि वा अश्रुतं (ख.); स्वर्गादिचान्यसाध्यं (ग, घ, ङ.)
5. पुनरनुरूपा (च.)

[1]तस्मात् स एव धात्वर्थस्तथा भावना अस्तु, स्वर्गं धात्वर्थश्चान्तरा[2] व्यापारान्तरानुपलब्धेरित्युक्तम् ।

उक्तोत्तरमेतत् । तथाहि—

फले न साक्षात् करणे कर्तुश्चेष्टा फलार्थिनः ।
करणत्वं प्रधानांशे [3]ताद्रूप्यं वा यतस्ततः ॥ ४५ ॥

भावनया यत्साध्यं न [4]सभवति स्वर्गादि धात्वर्थसाध्यत्वात् तस्या भावनायाः कथं तत् (कर्म) स्यात्, न कथंचिदपि स्यादिति भावनातो धात्वर्थनिष्पत्त्यङ्गीकरणात् प्रसक्तोऽयमनिष्टापत्तिदोषः ।

एवं पूर्ववादी भावनापक्षे दोषप्रसङ्गं दर्शयित्वा स्वपक्षमुपसंहरति—**तस्मात् स एव धात्वर्थस्तथा भावनास्तु स्वर्गं धात्वर्थं चान्तरा व्यापारान्तरानुपलब्धेरित्युक्तमिति** । तस्मात् — उक्तहेतुतः, स एव—फलसाधनत्वेनाभ्युपगतः धात्वर्थः तथा — फलभावनसामर्थ्यापेक्षया भावना भवतु, नार्थान्तरं । यदि धात्वर्थनिष्पादकव्यापारातिरेकेण धात्वर्थनिष्पाद्योऽन्यो व्यापारः फलधात्वर्थयोरन्तराले विद्येत तदा तस्मिन् व्यापारे स्वर्गधात्वर्थयोः कर्मकरणत्वे स्याताम् । न च सोऽस्तीत्युक्तं — 'न हि धात्वर्थकरण' इत्यादौ ।

इदानीं [5]सिद्धान्तवाद्याह **— उक्तोत्तरमेतदिति** । उक्तमस्य चोद्यस्योत्तरमस्माभिः "करणं खलु सर्वत्र कर्तृव्यापारगोचर" इति । अत्र हि भावनाविषयस्यापि

---

1. तस्माद्धात्वर्थ एव भावना अस्तु (ख, ग, घ, ङ.)
2. अन्तरेण (क, ख.)
   अनुपलम्भात् (ख, ग, घ, ङ.)
3. कर्तृत्वं वा यतस्ततः (ख.)
4. भवति (छ.)
5. सिद्धान्त्याह (च.)

सतो धात्वर्थस्य करणत्वं लोकप्रसिद्धम् परश्वादिकरणसाधर्म्यप्रदर्शनेन प्रतिपादितम् । कथम्?

[1] **अन्यार्थाप्तिविवक्षायामकर्मातिशयाद्विना ।**
उद्देशादन्यवृत्त्यापि फलमेवेष्यतेतराम् ॥ इति ।

अत्र फलस्य कर्मत्वोपपत्तिः करणस्याकर्मतोपपत्तिश्चोक्ता । तस्मान्नेह किंचिद्वक्तव्यमस्ति । तथाप्यजानतो भवतः तदेव स्पष्टीक्रियते इत्यनेनाभिप्रायेणाह -- **तथाहि**—

फले न साक्षात् करणे कर्तुश्चेष्टा फलार्थिनः ।
करणत्वं प्रधानांशे ताद्रूप्यं वा यतस्ततः ॥

अयमर्थः — सर्वत्रापि फलार्थिनः कर्तुर्न साक्षात् फले चेष्टा, किन्तु करणे । तथापि सा फलकर्मतां न जहाति, फलाभिसन्धानेन निर्वर्त्यमानत्वात् । तदेतत् फलार्थिन इति विशेषणनिदर्शितम् ।

ननु यदि कर्तुश्चेष्टायां करणस्य विषयभावः, क्व तर्हि करणभावः तस्य? न ह्येकस्यामेव चेष्टायामुभयथा सम्बन्धो घटते इत्याशङ्कापाकरणायोक्तं — करणत्वं प्रधानांश इति । एतदुक्तं भवति — न भावनायां साक्षात् करणस्य करणत्वं, किं तु प्रधानांशे— फलांशे प्रधानभूतफलांशकरणत्वद्वारेण तद्वत्यां भावनायां करणत्वमुच्यते । साक्षादेव वा भावनायां करणत्वमित्येतत्प्रतिपादनायोक्तं—ताद्रूप्यं वा यतस्तत इति ।

ततो—धात्वर्थात्, ताद्रूप्यं—भावनारूपत्वं व्यापारस्येति । अतः करणत्वमुपपद्यत इति । एतदुक्तं भवति — भाव्यसम्बन्धिरूपं व्यापारस्य भावनात्वं नाम । तच्च रूपं धात्वर्थाद् भवति । अतः भावनारूपेण करणसाध्यं व्यापाररूपेण च तत्साध्यमित्यविरोधः[2] ।

---

1. अन्यार्थास्ति (च.)
2. इत्यप्यविरोधः (च.)

नेमे [1] अन्यकर्मकरणत्वविलक्षणे फलधात्वर्थकर्मकरणत्वे [2]। [3] दर्शितं परशुना छिनत्तीत्यपि न [4] द्विधाभवने [5] कर्तृव्यापृतिः, [6] अपि तु करणे [7] साधननियोगादिलक्षणत्वात्कर्तुः [8]

अधुना श्लोकस्यार्थव्याचिख्यासयाह — **नेमे अन्यकर्मकरणत्वविलक्षणे फलधात्वर्थकर्मकरणत्वे इति ।**

अयमर्थः — फलस्य स्वर्गादेर्यत्कर्मत्वं यच्च धात्वर्थस्य यागादेः करणत्वमिमे [9] नान्यकर्मकरणत्वविलक्षणे — यत् खल्वन्यत् कर्म लोकप्रसिद्धं द्वैधीभावादि, न तत्कर्मत्वाद्विलक्षणं स्वर्गादिकर्मत्वम्, यच्चान्यत् लोकप्रसिद्धं करणं परश्वादि, न तत्करणत्वाद्विलक्षणं यागादेर्धात्वर्थस्य करणत्वं, किन्तु तादृशमेव। अतो न पर्यनुयोगयोग्यमित्यभिप्रायः । कथं पुनः लोकप्रसिद्धकर्मकरणत्वसाम्यं फलधात्वर्थकर्मकरणत्वयोः इत्याकाङ्क्षायामाह— **दर्शितं परशुना छिनत्तीत्यपि न द्विधाभवने कर्तृव्यापृतिः, अपि तु करणे, साधननियोगादिलक्षणत्वात् कर्तुरिति ।** उक्तमेतत् पुरस्तात् —

---

1. कर्मविलक्षणे (क.); कर्मकरणविलक्षणे (ख, ग, घ, ङ.)
2. विलक्षणे कर्मकरणत्वे (क.); फलधात्वर्थयोः कर्मकरणत्वे (ग, घ, ङ.)
3. दर्शितं हि छिनत्तीति (क.); दार्शितं छिनत्तीति (ख.)
4. न द्विधाभवन्नकर्तृ (क.); न हि द्विधाभावे कर्तृ (ग, घ, ङ.)
5. व्यावृत्तिः (क, ख, च, छ.)
6. किन्तु (क, ख.)
7. साधने (क, ख.)
8. वियोगादि (ग, घ, ङ.)
9. नान्यत् (च.)

[1] **तत्रैव चैष व्यापारः तदभिसन्धानात्,** [2] **अनन्यप्रकारत्वात्** ।

करणविषय एव साक्षात् कर्तृव्यापारः सर्वत्रेति 'करणं खलु सर्वत्र' इत्यादौ। तदेव पुनः स्पष्टीक्रियते। परशुना छिनत्तीत्यत्रापि हि न द्विधाभवनाख्ये फलेऽभ्यर्थ्यमानेऽपि साक्षात् कर्तृव्यापारः, अनुपपत्तेः। क्व तर्हि? करणे परश्वादौ। तद्वा कुत इत्याशङ्क्योक्तं— साधननियोगादिलक्षणत्वात् कर्तुरिति। साधनानां नियोगः (अ)प्रवृत्तानां प्रवर्तनं आदि-शब्दादनिवृत्तानां निवर्तनं च यतः कर्तुः लक्षणं अतस्तद्व्यापारस्य करणविषयता युक्ता।

नन्वेवं सति करणस्यैव परश्वादेः कर्मत्वं स्यात्, न फलस्य द्विधाभवनादे-रित्याशङ्क्याह— **तत्रैव चैष व्यापारः तदभिसन्धानादिति** ।

अयमर्थः— एषः — कर्तृव्यापारः, तत्रैव—फल एव, न करणमात्रपर्यवसायी। कुतः? तदभिसन्धानात्—फलाभिसन्धानात्। एतदुक्तं भवति — फलार्थिताप्रयुक्तः कर्तृव्यापारः साक्षात् करणविषयोऽपि न तन्मात्रे पर्यवस्यति, किन्तु तद्व्यवधानेन फलमपि व्याप्नोति। तदभिसन्धानात् फलाभिसन्धानाद्धि प्रवर्तमानः पुरुषः तन्निबन्धन-(तन्निर्वर्तन)समर्थे[3] कर्तृव्यापारे कर्तृत्वं अनुभवति। न चैकान्ततोऽन्यविषयस्य व्यापारस्या-न्यनिर्वर्तनसामर्थ्यम्। अतः करणव्यवधानेन फलमपि विषयीकरोति कर्तृव्यापार इति।

नन्वेवं तर्हि फलस्य कर्मत्वमेवौपचारिकं स्यात् करणव्यवधानादित्याशङ्क्याह — **अनन्यप्रकारत्वादिति** ।

---

1. तत्रैव व्यापारः (ग, घ, ङ, च, छ.)
2. तदभिसंज्ञानात् (क, ख.)
   प्रकारत्वाच्च (क, ख.)
3. समर्थे व्यापारे (छ.)

इयांस्तु [1] विशेषः — [2] धात्वर्थस्योत्पादेन [3] विनियोगः, [3] परश्वादेस्तु [4] सिद्धस्योद्यमननिपातनादिना । [5] वृक्षादेस्तु कर्मत्वं द्विधाभवने कर्तृत्वात्तदर्थं [6] परशुनिपातनोद्यमनलक्षणम् ।

नान्यः प्रकारः करणव्यवधाननिरपेक्षः कर्मसंबन्धेऽस्ति, किन्तु तत्सापेक्ष एव। अतो मुख्यस्यान्यस्य लोकप्रसिद्ध्यभावादिदमेव फलस्य मुख्यं कर्मत्वम् । तस्माल्लोकप्रसिद्धफल(कर्म)करणत्वाभ्यां फलधात्वर्थकर्मकरणत्वयोर्नास्ति विशेषः। किं कियानपि विशेषो नास्तीत्याशङ्क्याह — **इयांस्तु विशेषः — [7] धात्वर्थस्योत्पादेन विनियोगः, परश्वादेस्तु सिद्धस्योद्यमननिपातनादिनेति** ।

[8] इयान् विशेषः — परश्वादेः करणाद्धात्वर्थस्य करणस्य । परश्वादि स्वयं सिद्धस्वभावत्वात् स्वरूपेण न साध्यते किन्तु [9] उद्यमनादिव्यापाराविष्टतया। धात्वर्थस्तु स्वयमसिद्धस्वभावत्वात् स्वरूपेणैवोत्पाद्यते कार्योत्पादनाय फलार्थिभिः। कर्तृव्यापारविषयभूतस्तूभयत्रापि न विशिष्यते । भवतु कर्तृव्यापारविषयस्यापि परश्वादेः करणस्य करणत्वम्, वृक्षादेस्तु कर्मणः कथं कर्मत्वं किंलक्षणं, यत्र परश्वादेः करणत्वमित्यपेक्षायामाह — **वृक्षादेस्तु कर्मत्वं द्विधाभवने कर्तृत्वात् तदर्थं परशुनिपातनोद्यमनलक्षणं** इति। अस्ति हि वृक्षादेः द्विधाभवने कर्तृत्वम् । अतः छेदने कर्मता

---

1. भेदः (क, ख, ग, घ, ङ.)
2. उत्पादमा (क.); उत्पादनं (ग, घ, ङ.)
3. नियोगः (ग, घ, ङ.)
   परश्वादेश्च (क, ख.)
4. उद्यमनादि (क.); उद्यमनादिः (ख.); उद्यमनिपातनादिः (ग, घ, ङ.)
5. वृक्षादेश्च (क, ख, ग, घ, ङ.)
6. परशूद्यमननिपतनलक्षणं (क, ख.); परशुतिष्ठितं? निपातनोद्यमनादिलक्षणं (ग, घ, ङ.)
7. उत्पादनवियोगः (छ.)
8. एतावान्विशेषः (छ.)
9. व्यापारविशिष्टतया (च.)

भवनकर्तुर्हि भावना । ततश्च भवनकर्तृवृक्षाद्यर्थपरशुनिपातोद्यमनलक्षणं तस्य वृक्षादेः कर्मत्वमित्येतद् तदर्थेत्यादिनोक्तं कर्मलक्षणम् ।

ननु ईप्सिततमत्वं कर्मलक्षणम्, किमिदमन्यदुच्यते? नेदमन्यत्, किन्तु तदेव । तथाहि—यद् वृक्षाद्यर्थतया परश्वादेः करणस्य प्रवर्तनं तदेव वृक्षादेरीप्सिततमत्वम् । ननु वृक्षसमवायीप्सिततमत्वं अन्यच्चान्यसमवायि । कथमनयोरेकत्वम्? उच्यते—एकस्यैवोभयत्र व्यासज्य वृत्त्युपपत्तेः उभयाश्रितव्यवहारसंभवाददोषः सादृश्यादिवत् । तथाहि —(यथाहि) सादृश्यं एकमेव गोगवययोर्वर्तते, एक एव भेदो घटपटयोः, तथेहापि स्यादिति ।

अथवा कर्मत्वरूपोपाधिभूतार्थान्तरोक्त्या तदेव [1] विवक्ष्यतामिति । तथापी(हि-ई)प्सिततमत्वमतिशयेनेप्साविषयत्वम् । तच्च [2] तादर्थ्येनान्यस्यापि क्रिययाप्तुमिष्टत्वे सति भवति, तदपेक्षयेप्सातिशयोपपत्तेः । अतः यत्स्वयमेव अनन्यार्थया क्रिययाप्तुमिष्यते [यच्चान्यत्] तत् कर्मेत्युक्तं भवति ।

नन्वेवं सति सुखप्राप्तिदुःखपरिहारव्यतिरिक्तस्य न कस्यचिदपि कर्मता स्यात्, तद्व्यतिरिक्तस्योक्तलक्षणविरहात् । न हि वृक्षादिरपि छेदनादिकर्मत्वाभिमतोऽनन्यार्थतयाप्तुमिष्यते, किन्तु अन्यार्थतया । सत्यं, तथापि न तस्य कर्मत्वव्याघातः, क्रियान्तरापक्षेत्वादन्यार्थतायाः । तथाहि — योऽयं परशूद्यमनादिलक्षणः कर्तृव्यापारः न तेनैव वृक्षव्यतिरिक्तं प्रयोजनं प्रेप्स्यते, किन्तु तत्कर्मीभूतवृक्षसाध्यक्रियान्तरद्वारेण । वृक्षस्तु तेनैव, व्यापारान्तरानुपलब्धेः । तस्मादेकव्यापारविषयीभूतानां धात्वर्थानां यस्यैकस्य तद्व्यापारविषयीभूतेतरपदार्थप्रेप्सितत्वानपेक्षया प्रेप्सितत्वं यत्प्रेप्सितत्वोपाधिकं चान्यत्र तत्रेप्सितत्वातिशययोगात् कर्मलक्षणविरहाभावाद्युक्तं वृक्षादेः कर्मत्वमित्यनवद्यम् ।

---

1. विवक्ष्यत इति गृह्यताम् (छ.)
2. तादात्म्येन (च)

द्विधाभवनं [1] प्रति करणत्वं च परशोः छिनत्तौ [2] प्रधानापेक्षम्, ताद्रूप्यस्य वा तदधीनत्वात् ।

इदानीं 'करणत्वं प्रधानांशे' इति श्लोकोत्तरार्धसूचितमर्थमाविष्कर्तुमाह — **द्विधाभवनं प्रति करणत्वं च परशोः छिनत्तौ प्रधानापेक्षं ताद्रूप्यस्य वा तदधीनत्वादिति** । अनेन ग्रन्थेन परशोः छेदने तदुद्यमननिपातनलक्षणे करणत्वानुपपत्त्याशङ्का अपनीयते । का पुनस्तदाशङ्का? उच्यते — द्विधाभवनं हि परशुव्यापाराधीनात्मलाभम् न छेदनव्यापारः परशूद्यमनादिलक्षणः तदधीनात्मलाभः; तत्र कथं परशोः करणत्वमिति । इयमाशङ्कापनीयते । कथम्? प्रधानभूते फलांशे द्विधाभवनलक्षणे परशोः करणत्वम्, तद्द्वारेण चांशिनि व्यापारे करणत्वोक्तिः, न साक्षात्करणत्वेनेति ।

अत्रैषाक्षरयोजना — द्विधाभवने यत्करणत्वं परशोस्तच्छिनत्तौ प्रधानापेक्षमिति । 'ताद्रूप्यं वा यतस्ततः' इति [3] श्लोकैकदेशव्याख्यानायोक्तम् — 'ताद्रूप्यस्य वा तदधीनत्वात्' इति । ताद्रूप्यं भावनारूपत्वं व्यापारस्य तदधीनं परशुव्यापाराधीनम् ।

ननु द्विधाभवनमेव परशुव्यापाराधीनम्, न भावनात्वमपि । नैवं, द्वयस्यापि तदधीनत्वात् । न हि केवलं द्विधाभवनमेव परशुव्यापाराधीनम्, किन्तु उद्यमननिपातनरूपस्य व्यापारस्य छेदनभावनारूपत्वमपि । न चान्यथासिद्धिराशङ्कनीया, परशुव्यापारात् द्विधाभवनम् द्विधाभवनाद् व्यापा(रे)छेदनभावनारूपत्वमिति यतो न भाव्यभावनोत्तरकालं भावनारूपः ...... किन्तु तत्कालमेव ।

---

1. करणत्वं छिनत्तौ (क, ख); करणत्वं तच्च परशोः करणत्वं छिनत्तौ-(ग, घ, ङ)
2. प्रधानांशसापेक्षं, तदनपेक्षायां च करणत्वात् ताद्रूप्यस्य वा (क); प्रधानांशसापेक्षं, तदनपेक्षायां च कर्तृत्वात् ताद्रूप्यस्य वा (ख.)
3. श्लोकस्य व्या (च.)

नह्युद्यमन [1] निपातनमात्रमसम्भवद्द्विधाभवनं छिनत्तीति निरूप्यते ।

[2] तस्मादिहापि धात्वर्थस्योत्पादकोऽनुग्राहको वा कर्तृव्यापारः [3] समुद्दिष्ट-फलभवनतया प्रतिलब्धभावनाव्यपदेशो [4] धात्वर्थोपनिबद्धप्रधानांश [5] ताद्रूप्यफल-कर्मको धात्वर्थकरणकश्चेति न दोषः ।

अथवा विपरीतेनान्यथासिद्धिः । परशुव्यापारो ह्युद्यमनादिकर्तृव्यापारैकतामुप-गच्छंस्तमेव यावत् फलोदयं दीर्घ इत्येतस्य (दीर्घयति-एतस्य) फलभावनानुकूलस्वभावापादनेन भावनारूपतामापादयति । ततश्च लब्धभावनारूपात् व्यापारात् द्विधाभवनं वृक्षस्य सम्पद्यते । अतो युक्तमेवोक्तम् — ताद्रूप्यस्य वा तदधीनत्वादिति । कथं पुनरिदमवगम्यते परशोः छिनत्तौ प्रधानापेक्षं करणत्वं ताद्रूप्यस्य वा तदधीनत्वमिति ? अत आह — **नह्युद्यमन-निपातनमात्रमसंभवद्द्विधाभवनं छिनत्तीति निरूप्यते इति ।**

अयमर्थः — यत्र द्विधाभवनस्य फलस्यासंभवो निश्चितो भवति कठिनतरशिलातलादौ, न तत्र परशूद्यमननिपातनलक्षणो व्यापारः परशुना छिनत्तीत्यने(न) निरूप्यते, किन्तु उद्यमननिपातनमात्ररूपेण 'उद्यच्छति परशुं निपातयति च' इति । तत्र च परशोः कर्मत्वमेव । अतो यत्रोद्यमनादिव्यापारः छेदरूप (पाप) आपन्नो भवति तत्र परशोः करणत्वं, तदपेक्षितद्विधाभवनसंपादनात् तद्रूपेण [6] ताद्रूप्यस्योपपादनाद्वा । एवं लोकप्रसिद्धस्य कर्मणः करणस्य च स्वरूपमुपदर्श्याधुना तत्साम्यं फलधात्वर्थयोर्निगमयति — **तस्मादिहापि धात्वर्थस्योत्पादकोऽनुग्राहको वा कर्तृव्यापारः समुद्दिष्टफलभवनतया प्रतिलब्धभावनाव्यपदेशो धात्वर्थोपनिबद्धप्रधानांशताद्रूप्यफलकर्मको धात्वर्थ-करणकश्चेति न दोष इति ।**

---

1. असंभवनं (ख.)
2. अस्मात् (ख.); तस्मादपि (घ.)
3. व्यापारसमुद्दिष्ट (क, ख.)
4. निबन्धन (क, ख.)
5. तद्रूप (क, ख, च, छ.)
6. ताद्रूप्य संपादनाद्वा (च.)

न हि द्विधाभवति (भावयति) परशुनेति परशुं[1] द्विधाभवनं चान्तरेण कर्तृव्यापार [2]एकोऽपरसाध्योऽपरसाधन[3] उपलभ्यते । न च करणत्वं विरुद्धम्, प्रधानांशनिष्पत्तेस्तदधीनत्वात् । तथेहापि

इहापि—यजेत स्वर्गकाम इत्यादौ। धात्वर्थस्य—यागादेः संकल्पात्मकस्योत्पादकोऽयं प्रयत्नरूपः कर्तृव्यापारोऽनुग्राहको वा दृष्टेतिकर्तव्यतारूपानुष्ठानरूपः[4] स्वर्गादिफलकर्मको धात्वर्थकरणकश्चेति न विरुध्यत इति । व्यापारस्यैव विशेषणं समुद्दिष्टफलभवनतया प्रतिलब्धभावनाव्यपदेश इति । समुद्दिष्टमभिसंहितं फलभवनं यस्मिन् सोऽयं समुद्दिष्टफलभवनो व्यापारस्तस्य भावः समुद्दिष्टफलभवनता तया हेतुभूतया प्रतिलब्ध-भावनाव्यपदेशः— प्रतिलब्धः प्राप्तः आसादितः भावनाव्यपदेशः — भावनेतिव्यवहारः येनासौ प्रतिलब्धभावनाव्यपदेशो व्यापारः । उत्पाद्यानुग्राह्यधात्वर्थनिबन्धनः प्रधानांशः फललक्षणस्ताद्रूप्यं भावनारूपत्वं वा यस्य स धात्वर्थनिबद्धप्रधानांशताद्रूप्यः । स एव व्यापारो धात्वर्थविषयोऽपि फलकर्मको युज्यते फलाभिसन्धानप्रवर्तितत्वात्, धात्वर्थ-करणकश्च तदधीनप्रधानांशत्वात्तदधीनांशभावनारूपत्वाद्वा । अतो धात्वर्थफलयोरन्तराले व्यापारान्तरानुपलम्भो न दोष इत्यर्थः ।

व्यापारान्तरानुपलम्भस्यादोषत्वख्यापनायाह — **न हि द्विधाभवति (भावयति) परशुनेति परशुं द्विधाभवनं चान्तरेण कर्तृव्यापार एकोऽपरसाध्योऽपरसाधन उपलभ्यते । न च करणत्वं विरुद्धं प्रधानांशनिष्पत्तेस्तदधीनत्वादिति ।**

अयमर्थः— फलकरणान्तराले अन्यस्य कर्तृव्यापारस्याभावो लोकेऽप्यविशिष्टः । तत् कथम्? न हि परशुना द्विधाभावयतीत्यत्रापि परशुद्विधाभवनयोर्मध्ये कर्तृव्यापार एकः — प्राचीनपरशुविषयोद्यमननिपातनलक्षणः (णकर्तृ)कर्तृव्यापारादन्योऽपरेण परशुना साध्योऽपरस्य द्विधाभवनस्य साधनभूत उपलभ्यते, किन्तु एक एव । तथापि परशोः करणत्वं न विरुध्यते फलांशनिष्पत्तेः तदधीनत्वात् । एतत् प्रकृते योजयति—**तथेहापीति ।**

1. भावनं (क॰)
2. एकस्य साध्यो (ङ.)
3. साधनभूतः (क, ख.)
4. रूपानुष्ठानं (च॰)

[1-2] **फलभूतक्रियांशापेक्षत्वात्कारकविभक्तिविभागव्यवस्थायाः ।**

तथाहि —

[3] **प्रधानांशमुपादाय साधनान्येकवाक्यताम् ।**
व्रजन्ति नान्यव्यापारो रूपतो ह्यन्यसाधनः ॥ ४६ ॥

इहापि [4] धात्वर्थस्य व्यापारान्तराभावेऽपि [5] प्रधानांशनिष्पादनेन करणत्वमविरुद्धमित्यर्थः । अवश्यं च प्रधानांशापेक्षमेव करणत्वमभ्युपेयमितरकारकत्वस्यापि तथैवाभ्युपगन्तव्यत्वादित्याह — **फलभूतक्रियांशापेक्षत्वात् कारकविभक्तिविभागव्यवस्थाया इति** ।

अयमर्थः — न क्रियास्वरूपापेक्षा कारकविभागस्य कर्तृकरणादिरूपस्य तद्विभक्तीनां तृतीयादीनां व्यवस्था । अपि तु क्रियायां प्रधानभूतो योंऽशस्तदुपकारकत्वप्रकारभेदापेक्षया । अतो न केवलं करणत्वमेव [6] प्रधानांशापेक्षम्, किन्तु अन्यदपि सर्वं कारकत्वं तथैवेत्यभिप्रायः । एतदुपपादयति —

तथाहि —

प्रधानांशमुपादाय साधनान्येकवाक्यताम् ।
व्रजन्ति(नान्य)व्यापारो रूपतो ह्यन्यसाधनः ॥ इति ।

---

1. फलभूते (ग, घ, ङ.)
2. क्रियापेक्षत्वात् (क.); क्रियापेक्षित्वात् (ख.)
3. मुपाश्रित्य (क, ख.) .
4. धात्वर्थव्यापारा (च.)
5. प्रधाननिष्पादनेन (च.)
6. प्रधानापेक्षं (च.)

[1] **तस्मादनुपालम्भोऽयं व्यापारानुपलम्भ**[2] **इति । यच्चात्मकर्तृकेषु** [3] **यजत्यादिष्वसंभव इति, तत्र केचित् —**

भाष्ये यतेतेति गिरा प्रयत्नं प्रतिपेदिरे ।
अचेतने प्रयोगस्य प्राचुर्यान्नोपचारधीः ॥ ४७ ॥

अयमभिसन्धिः — एकस्मिन् व्यापारेऽनेकानि साधनानि प्रधानांशमपेक्ष्यान्वयं प्रतिपद्यन्ते, न व्यापारस्वरूपमपेक्ष्य, यतोऽन्यसाधनो व्यापारः स्वरूपतोऽन्यसाधनसाध्यो न भवति । एतदुक्तं भवति — व्यापाररूपेण व्यापारस्य स्वाश्रयव्यतिरिक्तसाधनापेक्षा न भवति स्वाश्रयमात्रेणैवात्मलाभात्। अतस्तद्रूपापेक्षया न साधनानामेकवाक्यभावः । [4] यस्तु तस्य भावनात्मतामापन्नस्य फलांशस्तत्साधनांशप्रकारभेदापेक्षया कारकाणि यथा-योगमन्वयं प्रतिपद्यन्ते फलांशतयैव च भावनयेतरांशापेक्षणात् । उपसंहरति— **तस्मादनुपालम्भोऽयं व्यापारानुपलम्भ इतीति ।**

तस्मादिदं दूषणं न भवति — यदुक्तं फलधात्वर्थयोर्मध्ये व्यापारान्तरं न दृश्यते इति, तदभावेऽप्यभिमतवस्तुसिद्धेः । अतः स्थितमेतद् गुणविशेषधात्वर्थातिरिक्तो व्यापारः करोत्यर्थः इति ।

यत्पुनरुक्तं व्यापारस्वरूपविचारावसरे परिस्पन्दव्यापारभावनापक्षे दूषणम्, तन्निराकरणायानुभाषते — **यच्चात्मकर्तृकेषु यजत्यादिष्वसंभव** इति । यदा परिस्पन्दः करोत्यर्थः तदा तस्यात्मकर्तृकेषु यजति जानातीत्यादिष्वसंभव इति ।

एवमनुभाष्य परमतमवलम्ब्य परिहारमाह — **तत्र केचित्—**

भाष्ये यतेतेति गिरा प्रयत्नं प्रतिपेदिरे ।
अचेतने प्रयोगस्य प्राचुर्यान्नोपचारधीः ॥

---

1. तस्मादुपालम्भो (च, छ.)
2. व्यापारान्तरानुपलंभादिति (क, ख, ग, घ, ङ.)
3. यजत इत्यादिषु (क, ख, ग, घ, ङ.)
4. यत्तु (च.)

'तथा यतेत [1] यथा यत्किंञ्चिद्भवतीति [2] फलभा(भ)वनानुकूलः प्रयत्न एवाख्यातार्थो दर्शितः । [3] अचेतने त्वाख्यातप्रयोग उपचारात् । [4] प्रयोगप्राचुर्यान्नौपचारिकः (कप्र) प्रत्ययः । [5] इदन्तु समाधानं [6] सिद्धे तद्भावे स्यात् । न च प्रत्यये समाने हेत्वन्तरे [7] चासति तत्प्रसिद्धिरस्ति, [8] विपर्ययावगमस्याशक्यवारणत्वात् ।

'तथा यतेत यथायत्किञ्चिद्भवति' इति आख्यातस्य भावनार्थताव्याख्यानपरे भाष्यवाक्ये यतेतेति प्रयत्नार्थाभिधानात् प्रयत्नमेव भावनां केचिदङ्गीकृतवन्तः । कथं तर्हि तस्याचेतने प्रयोगः? उपचारात् । कथं तर्ह्युपचारबुद्ध्यभावः? प्राचुर्यात् । प्रयोगप्राचुर्याद्धि औपचारिकोऽपि शब्दो मुख्यवदेवास्खलितां स्मृतिं जनयतीति । एतद् व्याचष्टे—**तथा यतेत यथा यत्किञ्चिद् भवतीति फलभा(भ)वनानुकूलः प्रयत्न एवाख्यातार्थो दर्शितः । अचेतने त्वाख्यातप्रयोग उपचारात्, प्रयोगप्राचुर्यान्नौपचारिकः (कप्र) प्रत्यय** इति ।

अस्यायमर्थः—प्रयत्न एव भाव्यभवनानुकूलतया भावनारूपतां प्रतिपन्न आख्यातार्थो दर्शितो भाष्यकारेण 'तथा यतेत यथा यत्किञ्चिद् भवति' इति ब्रुवाणेन । ननु आत्मकर्तृकप्रयत्नाभावेऽपि अचेतने आख्यातप्रयोगो दृष्टो रथो गच्छतीत्यादावित्युक्तम् इत्याशङ्क्योक्तम्— अचेतने त्वाख्यातप्रयोग इत्यादि । नात्र तिरोहितं किञ्चिदस्ति ।

एवं पराभिमतं समाधानमनुभाष्येदानीं एतन्निराकरणायाह—**इदं तु समाधानं सिद्धे तद्भावे स्यात् । न च प्रत्यये समाने हेत्वन्तरे चासति तत्प्रसिद्धिरस्ति, विपर्ययावगमस्याशक्यवारणत्वादिति** ।

---

1. यथा किञ्चिद्भवतीति (ग, घ, ङ.)
2. भवतीति भवनानु (ख.)
3. आख्यात उपचारात्प्रयोगः । प्राचुर्याच्च (क.)
4. प्राचुर्यात्तु (ग, घ, ङ.)
5. इदञ्च (क)
6. प्रासिद्धे (ख, ग, घ, ङ.)
7. वासति (क, ख.)
8. रित्यस्ति (क, ख.)

उदासीनत्वविच्छेदसामान्यात्मा ततो मतः ।
[1]करोत्यर्थो [2]द्वयोश्चेह तद्रूपप्रत्ययोद्भवः ॥ ४८ ॥

अयमाशयः — यद्याख्यातस्य प्रयत्नमात्रवचनत्वं निश्चितं स्यात्तदा तदभावे प्रयोग औपचारिक इति कल्पना स्यात् । औपचारिकत्वनिश्चयपूर्विका च प्रयोग-प्राचुर्यादुपचारबुद्ध्यभाव इति कल्पना । न चैतद् द्वयमपि सिद्धम् । कथं? न तावत् आख्यातस्य प्रयत्न एवार्थो न परिस्पन्दो भवतीति शक्यते नियन्तुम्, चेतनव्यापार इवाचेतनव्यापारेऽपि प्रयोगात् । नह्युभयत्रापि प्रयोगाविशेषे एक एवार्थो ग्रहणमर्हति । अत एवाचेतने प्रयोगस्यौपचारिकत्व-मसिद्धं भवति । ततश्च 'प्राचुर्यात् नोपचारधीः' इत्यनुपपन्नम् इति ।

अत्राक्षरयोजना— प्राचुर्यान्नोपचारधीरिति यदिदं समाधानं—परिहारः स सिद्धे (तद्भावे—) सति स(त)द्भावनिश्चये संभवति तस्यौपचारिकस्य प्रयोग(स्य भावे अचे) स्तद्भावो चेतनविषयस्य प्रयोगस्यौपचारिकत्वे सिद्ध एवेदं उपपद्यते नासिद्धे । न च तस्य प्रसिद्धिरस्तीति व्यवहितेन संबन्धः । तत्र हेत्वपेक्षायामुक्तम् 'प्रत्यये' इत्यादि । प्रत्यये — विज्ञाने समाने सति हेत्वन्तरे चौपचारिकत्वप्रतिपत्तिहेतावसत्यविद्यमान इति ।

विपर्ययावगमस्याशक्यवारणत्वादिति । अयमर्थः — विपर्ययस्यावगमो विपर्यया-वगमः । विपर्ययो वैपरीत्यं तदवगमस्य वारणं न शक्यमिति, यतो न प्रसिद्धिरस्ति । एतदुक्तं भवति — यदि प्रत्यये समाने हेत्वन्तरे चासत्यपि प्रयत्न एवाख्यातस्य मुख्योऽर्थः, परिस्पन्दे तूपचारात् प्रयोग इति स्वेच्छामात्रेण परिकल्प्यते, तदा परिस्पन्द एव मुख्योऽर्थः [यत्र] रथो गच्छतीत्यादि प्रयोगदर्शनात्; आत्मकर्तृके तु प्रयत्नाख्ये व्यापारे यजते जानातीत्यादिप्रयोग उपचारादिति कस्मान्नेष्यते इति वदन् न दण्डैः पराणुद्यत इति । तस्मादसमञ्जसं समाधानमिति ।

प्रयत्नपरिस्पन्दसाधारण्येन भावनारूपं निरूपयितुमाह —

उदासीनत्वविच्छेदसामान्यात्मा ततो मतः ।
करोत्यर्थो द्वयोश्चेह तद्रूपप्रत्ययोद्भवः ॥

1. करोत्यर्थद्वये (घ); करोत्यर्थान्वये (ख); करोत्यर्थो द्वये (ग, घ.)

[1]उदासीनत्वविच्छेदो हि करोत्यर्थः, उदासीने [2]क्रियाज्ञानाभावात् ।

अयमर्थः — यदुभयोः प्रयत्नपरिस्पन्दयोरनुवर्तमानं रूपम् उदासीनत्वविच्छेद-सामान्याकारबुद्धिसंवेद्यं तत्स्वभावः करोत्यर्थः इत्युभयत्रापि आख्यातप्रयोगोपपत्तिरिति । इदानीं अक्षरयोजना — तत इत्यत्र यत इत्यध्याहर्तव्यम् । यतः प्रयत्नमात्रस्य करोत्यर्थत्वे पूर्वोक्तो दोषो दुर्वारः ततस्तन्मात्रातिरिक्त उदासीनत्वविच्छेदसामान्यात्मा करोतेरर्थः । उदासीनत्वं — निर्व्यापारत्वं तस्य विच्छेदः, सामान्यं — साधारणं प्रयत्नपरिस्पन्दयो-रुदासीनत्वविच्छेदसामान्यम्, तदेवात्मा स्वरूपं यस्य सोऽयं उदासीनत्वविच्छेदसामान्यात्मा करोत्यर्थोऽभिमतः । इह द्वये प्रयत्नपरिस्पन्दात्मके तद्रूपप्रत्यययोद्भवः उदासीनत्व-विच्छेदरूपस्य प्रत्ययस्योद्भवः उदयोऽस्ति । अतस्तद्रूपप्रत्यययोद्भवस्योभयत्रापि भावात् तद्रूपोऽर्थोऽनुवर्तमानो दृश्यते । ततश्च स एव करोत्यर्थो भावना आख्याताभिधेय इति ।

ननु किमिदमुदासीनत्वं नाम? व्यापाराभाव इति चेन्न; व्यापारस्यैव जिज्ञासनात् । इह हि व्यापारस्यैव स्वरूपं मृग्यते । तत्र कथं तत्सिद्धवत्कारेण तल्लक्षणोक्तिः संभवति । कश्चायमुदासीनत्वस्य विच्छेदो नाम? तस्याभाव इति चेत् — कथमभावस्याभावः? कथं वा अभावरूपस्य करोत्यर्थता? उच्यते — उदासीनत्वशब्देन निर्व्यापारत्वमेवोच्यते । तस्य च व्यापाराभावरूपस्य विच्छेदो व्यापाराभाव (रभाव) एव । नह्यभावस्य विच्छेदो भावादन्यः सर्वत्रापि समस्ति । तस्मान्न करोत्यर्थस्याभावताप्रसङ्गः ।

यदुक्तमसिद्धे व्यापारे लिलक्षयिषिते तदवच्छिन्नेनार्थेन तल्लक्षणमयुक्तमिति; तदपि न, देवदत्तादिपदार्थाश्रितपूर्वापरीभूतस्वभावव्यापारप्रतिपत्त्युपलक्षणार्थ-त्वादुदासीनत्वविच्छेदवाचोयुक्तेः । तथाहि— यः सिद्धरूपपदार्थस्य पूर्वापरीभूतात्मावस्था-विशेषः सिद्धपदार्थविलक्षणाकारव्यापारप्रत्ययः (य) संवेदनीयः स करोत्यर्थ इति व्यापार-बुद्धिरेव यथोक्तलक्षणा व्यापारलक्षणत्वेनोदासीनत्वविच्छेदवाचा विवक्ष्यते इत्यनवद्यम् । इदानीं श्लोकं विवृणोति — **उदासीनत्वविच्छेदो हि करोत्यर्थः, उदासीने क्रियाज्ञानाभवादिति** ।

1. औदासीन्य (ग, घ, ङ.)
2. क्रियात्माभावात् (क, ख.)

[1] **उदासीनताप्रच्युतिधियश्च द्वैधम्, आत्मनि प्रयत्नात्,** [2] **अन्यत्र परिस्पन्दात्।**
[3] **तथाहि —**

[4] **प्रयत्नवन्तमात्मानमनुदासीनं कुर्वाणं व्यापारवन्तमवैति, परिस्पन्दमानं** [4] **चान्यत्। अतः** [5] **प्रयत्नपरिस्पन्दयोरौदसीन्यविच्छेदसामान्ययोस्तदाभासधी** [6–7] **विषयत्वेन क्रियापदार्थत्वान्नात्मकर्तृकेषु तदभाव इति।**

अयमाशयः — उदासीने स्तिमिते स्वरूपमात्रेणावस्थिते क्रियाप्रतीतिर्नास्ति। अनुदासीने च अस्ति। ततोऽन्वयव्यतिरेकाभ्यामुदासीनत्वविच्छेदः क्रियाज्ञानस्य विषय इति स एव करोत्यर्थः। औदासीन्यस्य प्रच्युतिः (तिप्र) प्रतिपत्तिश्च प्रकारद्वयेन भवति आत्मानात्मनोः। आत्मनि प्रयत्नवति परिस्पन्दशून्ये प्रयत्नाद्भवति। अनात्मनि तु प्रयत्नशून्ये परिस्पन्दवति परिस्पन्दादेव। तदेतदाह -- **उदासीनताप्रच्युतिधियश्च द्वैधमात्मनि प्रयत्नादन्यत्र परिस्पन्दादिति।** एतदुपपादयति — **तथाहि — प्रयत्नवन्तमात्मानमनुदासीनं कुर्वाणं व्यापारवन्तमवैति परिस्पन्दमानश्चान्यदिति।**

अयमर्थः — सर्वोऽयं लोको व्यापारं कुर्वाणमात्मानं प्रयत्नवन्तमनुदासीनमवैति। प्रयत्नवत्त्वादनुदासीनं व्यापारवन्तमवैतीति। आत्मनोऽन्यच्छरीरादिकं परिस्पन्दमानमनुदासीनमवैतीति सम्बन्धः, परिस्पन्दमानत्वादचेतने शरीरादावित्यर्थः। भवतू- [8] दासीनत्वविच्छेदबुद्धिविषयत्वमुभयोरपि प्रयत्नपरिस्पन्दयोः, किमतो भवतीत्यत आह — **अतः प्रयत्नपरिस्पन्दयोरौदासीन्यविच्छेदसामान्ययोस्तदाभासधीविषयत्वेन क्रियापदार्थत्वान्नात्मकर्तृकेषु तदभाव इति।**

---

1. उदासीना प्रच्युतिश्च द्वेधा (क, ख.); औदासीन्यप्रच्युतेश्च द्वैधं (ग, घ, ङ.)
2. अन्यत्न रथादौ (ग, घ.)
3. तथा प्रयत्न (क, ख.)
4. कथं यतमानमात्मानं (ग, घ, ङ.)
   चान्यं (क, ख, ग, घ.)
5. औदासीन्यप्रच्युतिसामान्य (क, ख.); औदासीन्यविच्छेदसामान्यांश (ग, घ, ङ.)
6. तदवभास (ग, घ, ङ.)
7. विषयत्वेनाक्रियापदत्वं नानात्म (ख.)
8. उदासीनत्वबुद्धिविच्छेदाविषयत्वं (छ.)

तदुक्तम् — 'न परिस्पन्द एवैकः क्रिया नः कणभोजिवत्' इति ।
अथापि [1]परिस्पन्देन [2]प्रयोजनम्, असौ —

मनोभूतपरिस्पन्द आत्मनस्तत्प्रयत्नजः ।
विक्लित्त्यादिर्यथा तस्मिन्साधनोपनिपाततः ॥ ४९ ॥

अयमर्थः — द्वयोरपि प्रयत्नपरिस्पन्दयोरौदासीन्यविच्छेदसामान्यरूपता कुत इत्यपेक्षायामुक्तं — तदाभासयोः[3] क्रियापदार्थत्वादात्मकर्तृकेषु जानातीत्यादिषु न तस्याः क्रियाया अभावप्रसङ्गः । प्रयत्नपरिस्पन्दयोरौदासीन्यविच्छेदसामान्यरूपता कुत इत्यपेक्षायामुक्तं — तदाभास(धी)विषयत्वेनेति । उदासीनत्वविच्छेद-सामान्याकारबुद्धिस्तदाभासधीः तस्य (स्या) विषयत्वेन हेतुना तद्रूपत्वम् ततश्चोभयोरपि प्रयत्नपरिस्पन्दयोः क्रिया (त्वं) विद्यते एवेत्यर्थः । उक्तं च परिस्पन्दव्यतिरेकेण प्रयत्नस्यापि क्रियापदार्थत्वं भट्टाचार्यैः इत्याह — **तदुक्तं — "न परिस्पन्द एवैकः क्रिया नः कणभोजिवद्" इति ।** उत्क्षेपणादिपञ्चप्रकारभेदाभिन्नः परिस्पन्द एवैकः क्रियापदार्थः न प्रयत्न इति [4]कण-भुजो मतम् । न तथास्माकम् प्रयत्नस्यापि परिस्पन्दवत् क्रियापदार्थत्वाभ्युपगमादित्यर्थः ।

यदि मन्येत—यथा परिस्पन्दे स्फुटतरा क्रियाप्रसिद्धिर्लोके न तथा प्रयत्ने । अतः आत्मकर्तृकेषु परिस्पन्देन प्रयोजनं तस्यैव क्रियात्वव्यवहारसंभवादिति, तर्ह्यसावपि परिस्पन्द आत्मनः कथंचित् संभाव्यत इत्याह — **अथापि परिस्पन्देन प्रयोजनम्, असौ —**

मनोभूतपरिस्पन्द आत्मनस्तत्प्रयत्नजः ।
विक्लित्त्यादिर्यथा तस्मिन्साधनोपनिपाततः ॥ इति ।

अथापीति शङ्कानुभाषणम् । तत्परिहारश्लोको मनोभूतेत्यादि । तत्र श्लोकादधस्तान्निर्वाहकोऽसावित्यसौ शब्दः श्लोकोपनिविष्टपदैकवाक्यभावेन योजनीयः असौ परिस्पन्द आत्मनोऽप्यस्तीति ।

---

1. स्पन्देनात्मनः प्रयोजनं (ख.); स्पन्देन वः प्रयोजनं (ग, घ, ङ.)
2. प्रयोजनं आत्मप्रयत्नजं (क.)
3. औदासीन्यविच्छेदसामान्यरूपयोः (छ.)
4. कणभोजिमतं (च.)

[1] **आत्ममनस्संयोगविशेषाद्विज्ञानसङ्कल्पाद्युत्पत्तिः । तन्निबन्धनमात्मसमवेतादृष्टप्रयत्नहेतु**[2] **मनसि कर्म**[3] **परिस्पन्दरूपमुपेयते । आत्मप्रयत्नापेक्षश्च भूतेषु**[4] **द्रव्योपादानादिलक्षणः परिस्पन्दः ।**[5] **उभयोऽप्ययमात्मनस्तदधीनत्वात् ,**

ननु सर्वगतस्यात्मनः कथं परिस्पन्द इत्याशङ्कापाकरणायोक्तम् — **मनोभूतपरिस्पन्द** इति ॥ मनसो भूतानां च पृथिव्यादीनां देहेन्द्रियाकारेण परिणतानां यः परिस्पन्दः स आत्मनः परिस्पन्द इत्युच्यते, न पुनरात्मसमवेतः । अतो नोक्तदोषः । कथं पुनर्मनोभूतसमवेतः परिस्पन्द आत्मनः स्यात् , स्वाश्रिते हि व्यापारे स्वयं कर्ता भवति इत्यत उक्तम् — **तत्प्रयत्नज** इति । तस्यात्मनः प्रयत्नाज्जातत्वान्मनोभूताश्रितोऽपि परिस्पन्द आत्मन इत्युच्यते, नात्माश्रितत्वेन । कथं पुनस्तत्प्रयत्नजत्वमात्रेणान्याश्रितोऽपि व्यापारस्तस्य स्यादित्यत उक्तम् — **विक्लित्त्यादिर्यथा** इति । यथा विक्लित्त्यादिस्तण्डुलादिसमवेतोऽपि देवदत्तस्य व्यापारस्तथेहापीति ॥

ननु विक्लित्त्यादिर्देवदत्तादीनां व्यापार इत्येतदेव कुत इत्यत आह — **तस्मिन्साधनोपनिपातत** इति । तस्माद्वि(स्मिन् वि)क्लित्त्यादौ कर्त्रादीनां साधनानां यत उपनिपात अन्योन्यसम्बन्धो न स्वाश्रितव्यापारमात्रे । अतो देवदत्तादिसाधनाधीनात्मलाभतया तदाश्रितो विक्लित्त्यादिस्तत्क्रियात्मतां न जहातीत्यर्थः ।

इदानीं श्लोकं विवृणोति — **आत्ममनस्संयोगविशेषाद्विज्ञानसङ्कल्पाद्यु-**[6] **त्पत्तिस्तन्निबन्धनमात्मसमवेतादृष्टप्रयत्नहेतु**[7] **मनसि कर्म परिस्पन्दरूपमुपेयते । आत्मप्रयत्नापेक्षश्च भूतेषु द्रव्योपादानादिलक्षणः परिस्पन्दः । उभयोरपि (योऽप्ययं) आत्मनस्तदधीनत्वादिति ।**

---

1. संयोगाद्विज्ञानसंकल्पविशेषाद्युत्पत्तेः (ख.)
2. हेतुकं (ख.)
3. कर्म स्पन्द (ख.)
4. दानलक्षणः (क.)
5. रप्यात्मनः (ख.); रप्यसावात्मनः (ग.)
6. उत्पत्तितन्निबन्धन (च.)
7. हेतुः (छ.)

अयमर्थः — मनोभूतपरिस्पन्द आत्मप्रयत्नाज्जायते[1]। कथम्? आत्ममनसोऽयंः संयोगविशेषः तस्मादसमवायिकारणादात्मनि समवायिकारणे विज्ञानं सङ्कल्पविशेषश्च [2]यागादिर्देवतोद्देशेन द्रव्यत्यागादिरूप उत्पद्यते। आदिग्रहणादिच्छादयश्च। यश्चासौ ज्ञानाद्युत्पत्तिहेतुः[3] आत्ममनस्संयोगः तस्य निबन्धनं कारणं मनसि परिस्पन्दरूपं कर्माभ्युपगम्यते।

नन्वात्ममनसोः संयोगो नित्यः। तस्य कथं मनःपरिस्पन्दो हेतुः (न) स्यात्? उच्यते — [4]आत्मप्रदेशविशेषेणाप्राप्तेन मनसो यः कादाचित्कः संयोगः स ज्ञानाद्युत्पत्तिहेतुरिति तस्य मनःपरिस्पन्दो हेतुरिहोच्यते इति। किंकारणं किं (णकं) पुनस्तन्मनसि कर्मेत्यपेक्षायामुक्तम् — आत्मसमवेतादृष्टप्रयत्नहेत्विति। आत्मनि समवेतं यददृष्टं धर्माधर्मलक्षणं प्रयत्नश्च तावदृष्टप्रयत्नौ यस्य कर्मणो हेतू तदेतदात्मसमवेतादृष्टप्रयत्नहेतु मनसि कर्मेति।

एवं ज्ञानसङ्कल्पाद्युत्पत्तिकारणान्तःकरणसंयोगहेतुतया आत्मनः परिस्पन्दं निरूप्य तस्यात्मप्रयत्नजत्वं चोक्त्वा (भूतपरिस्पन्द) स्वरूपं (तस्य) आत्मप्रयत्नजत्वं च दर्शयितुमुक्तम् — आत्मप्रयत्नज(त्नापेक्ष)श्च भूतेषु द्रव्योत्पादन (व्योपादानादि) लक्षणं (णः) परिस्पन्द इति। योऽयं द्रव्योपादानलक्षणः परिस्पन्दः स आत्मप्रयत्नापेक्षः। सति ह्यात्मप्रयत्ने तत्संयुक्तेषु देहाकारपरिणतेषु भूतेषु द्रव्योपादानादिलक्षणः परिस्पन्दः। अतः स तदपेक्षः। आत्मप्रयत्नाधीनत्वाच्च उभयोऽपि अयं मनःसम्बन्धी भूतसम्बन्धी च परिस्पन्द आत्मन एव तदधीनत्वादित्येतदुक्तमुभयोऽपीत्यादिना।

---

1. जायते आत्म (च.)
2. यागादि देवतो (च.)
3. हेतुकात्म (छ.)
4. आत्मपरिस्पन्दविशेषेण (क, ख, ग, घ, ङ, च.)

विक्लित्त्यादिवत्[1] । **विक्लित्तिच्छिदाभिदास्तण्डुलादिसमवायिन्योऽसमवेता**[2] **अपि देवदत्ते**[3] **तत्क्रियाः, तासु तस्य कर्तृत्वात्, प्रधानक्रियायां सर्वकारकोपनिपातात्, एकवाक्यत्वात् । न हि स्वव्यापारविषयः करणादिभावः कारकाणाम्, तेषां**[4] **भेदादेकवाक्यत्वानुपपत्तेः**[5] **।**

एवं श्लोकस्य पूर्वार्धं व्याख्यायाधुनोत्तरार्धं व्याख्यातुकामो विक्लित्त्यादिर्यथेति निर्दिष्टं दृष्टान्तं व्याचष्टे — **विक्लित्त्यादिवत् । विक्लित्तिच्छिदाभिदास्तण्डुलादिसमवायिन्योऽसमवेता अपि देवदत्ते तत्क्रियास्तासु तस्य कर्तृत्वादिति** ।

अयमर्थः — तण्डुलान् पचतीत्यत्र धात्वर्थभूता विक्लित्तिस्तण्डुलेषु समवेता, घटं भिनत्तीत्यत्रापि भिदा घटे समवेता, वृक्षं छिनत्तीत्यत्र च छिदा वृक्षे समवेता, न देवदत्ते । ताश्चैता विक्लित्तिच्छिदाभिदाः तण्डुलादिसमवायिन्यो देवदत्ते च(चा) समवेता अपि (तत्) क्रियास्तस्य देवदत्तस्य क्रिया एवेति । कथं पुनरन्यसमवायिन्यो देवदत्तेऽसमवेतास्तत्क्रिया वा स्युः इत्याशङ्क्याह — **तासु तस्य कर्तृत्वादिति** । तासु विक्लित्त्यादिषु तस्य देवदत्तस्य कर्तृत्वात् तस्य क्रिया भवन्त्येवेत्यर्थः ।

कथं पुनस्तासु देवदत्तस्य कर्तृत्वमित्यपेक्षायामाह — **प्रधानक्रियायां सर्वकारकोपनिपातादिति** । प्रधानक्रिया फलक्रिया भाव्यनिष्ठस्वभावा क्रिया तस्यां सर्वेषां कारकाणामुपनिपातात् अन्वयादित्यर्थः ।

कथं पुनस्सर्वकारकाणां प्रधानक्रियोपनिपात इत्याशङ्क्याह — **एकवाक्यत्वादिति** ।

अयमर्थः — एकार्थताकृतं यदेकवाक्यत्वं पदानाम् तदेवं सत्युपपद्यते, अनेककारकसाध्यैकक्रियाप्रतिपादनात् । एका हि प्रधानक्रिया, न पुनः कारकाणां

1. वत्—तथाहि—विक्लित्ति (क, ख, ग.)
2. देवदत्तेऽसमवेता (ग.)
3. देवदत्तस्य क्रियाः (ग, घ, ङ.)
4. हेतुभेदा (ङ.)
5. वाक्यता (ग.)

एवञ्च कर्तृविनियोज्यतया सर्वसाधनानां [1] तद्व्यापारः कर्तुरिति तेषां भावनान्तर्गतिः [2] तन्मुखेन साधनताप्युपपन्ना ।

प्रातिस्विकावान्तरक्रियावद्भिन्ना । अतः सर्वकारकाणां प्रधानक्रियोपनिपात एव तत्प्रतिपादकानां पदानामेकवाक्यभावहेतुरिति ।

ननु स्वव्यापारोपनिपातादेव कारकाणामनपेक्ष्य प्रधानक्रियोपनिपातमेकवाक्यभावः कस्मान्नेष्यत इत्याशङ्क्याह — **न हि स्वव्यापारविषयः करणादिभावः कारकाणाम् तेषां भेदादेकवाक्यत्वानुपपत्तेरिति** ।

स्वव्यापारे सत्यपि कर्तृत्वे तद्विपर्ययः (द्विषयः) करणादिभावो न सम्भवति । यदि कारकाणां करणादिभावः स्वव्यापारविषयः ततः तेषां स्वव्यापाराणां भेदात् एकविषयोपनिपाताभावादेकवाक्यता न स्यात् । प्रधानक्रियाविषयत्वे तु तस्याः सर्वकारकसाधारणत्वादेकत्वाच्चैकवाक्यतोपपद्यते । स्वव्यापारद्वारेण च प्रधानोपनिपातः । तत्र कर्ता स्वव्यापारे कर्तृत्वात्प्रधानक्रियायां कर्ता भवति । कारकान्तराणि तु स्वव्यापारे कर्तृणि सन्ति प्रधानक्रियायां करणादिभावेन सम्बध्यन्ते । तस्याः कर्ता समवायिकारणम् । कारकान्तराणि तु निमित्तकारणमिति विशेषः । तस्मादात्मप्रयत्नजत्वान्मनोभूतपरिस्पन्द आत्मनः विक्लित्त्यादिरिव देवदत्तादेरिति प्रतिपादितस्य फलं दर्शयति — **एवञ्च कर्तृविनियोज्यतया सर्वसाधनानां तद्व्यापारः कर्तुरिति तेषां भावनान्तर्गतिः तन्मुखेन साधनताप्युपपन्नेति** ।

कर्तृविनियोज्यतया सर्वकारकाणां तेषां व्यापाराः कर्तुरेव व्यापारा भवन्ति । ततश्च सर्वकारकव्यापाराणां कर्तृव्यापारान्तर्भावात् भावनान्तर्गतिरुपपन्ना । तन्मुखेन

1. तद्व्यापाराः (क.)
2. तन्मुखेन च (ग, घ, ङ.)

परोपाधिक्रियारूपो[1] ज्ञायते न क्रियान्तरम् ।
सम्बन्धादेव साध्यत्वमतः करणसङ्गतिः ॥ ५० ॥

कारकान्तरव्यापारमुखेन कर्तुरपि साधनता कर्तृतोपपन्ना इति । न हि साक्षात् कर्तुः फले व्यापारः कारकान्तरव्यवधानमन्तरेण । अपि च यदि कारकान्तरव्यापाराः कर्तुर्नस्युः, तदा न कर्तुः फलसाधनत्वम्, अन्यव्यापारफलेऽन्यस्य कर्तृ (र्तुः) साधनत्वेऽतिप्रसङ्गात् । यदा तु कारकान्तरव्यापारा अपि कर्तृविनियोज्यतया कर्तृव्यापारान्तर्भावं भजेरन्, तदा तद्व्यापारेण कर्तुः साधनताप्युपपद्यत इत्यर्थः ।

अथवा तन्मुखेन साधनताप्युपपन्नेत्यस्यायमर्थः—भावनान्तर्गतिमुखेन कारकान्तराणां फलसाधनताप्युपपन्नेति ।

ननु प्रयत्नपरिस्पन्दयोरन्यतरस्य करोत्यर्थत्वे कथं चैतन्यमूर्तिविरहात् तद्रहितेषु करोतेः प्रयोगः? उपचारत इति ब्रूमः । प्रयोगप्राचुर्याच्च नोपचारबुद्धिरिति सन्तोष्टव्यम् ॥

इदानीमस्मिन्पक्षे पूर्वपक्षवादिनोद्भावितान्दोषान्परिहर्तुकाम आह — तत्र यदुक्तम् 'धातुप्रत्यययोर्वाच्ये प्रतीयेते न हि क्रिये' इति, तथा 'सम्बन्धो नावकल्पेत द्वयोस्साध्याभिधायिनोः' इति, तथा 'न भावे नापि धात्वर्थे कार्ष्ठैरिति सगागमः । अक्रियात्वादन्यरोधात्,' इति; एतद्दूषणत्रयमनेन श्लोकेन परिहरति —

परोपाधिक्रियारूपो ज्ञायते न क्रियान्तरम् ।
सम्बन्धादेव साध्यत्वमतः करणसङ्गतिः ॥ इति ।

परोपाधिक्रियारूपो धात्वर्थः परोपाधिकमस्य क्रियारूपम् न स्वाभाविकम् प्रत्ययाभिधेयक्रियोपरागकृतम् । अतो न क्रियान्तरं ज्ञायते । यतश्च धात्वर्थस्य

---

1. रूपत्वात् (ग).

[1] **धात्वर्थस्य भावनामनुरञ्जयतः तद्विषयताप्रतीत्या[2] तत्परामर्शकृतं[3] तदन्तर्गतस्य [4] क्रियात्वमिति कुतः क्रियाद्वयप्रत्ययः?[5] न हि जातिगुणोपरक्तेषु द्रव्येषु तद्रूपभेदः ।**

प्रत्ययार्थसंबन्धादेव साध्यत्वम्, न स्वतः, अतः 'सम्बन्धो नावकल्पेत' इति प्रसङ्गः परिहृतः; सम्बन्धाभावे धात्वर्थसाध्यताभावप्रसङ्गात्। यतश्च भावनासम्बन्धादस्य साध्यत्वम्, अतः काष्ठादिना करणेन 'काष्ठैः पाकः' इति सम्बन्ध उपपद्यते । न च करणत्वाद्धात्वर्थस्य करणान्तरासङ्गतिराशङ्कनीया, करणस्यापि परोपाधिक्रियारूपतया करणसङ्गत्युपपत्तेरिति ॥

श्लोकस्यार्थं विवृणोति — **धात्वर्थस्य भावनामनुरञ्जयतस्तद्विषयताप्रतीत्या तत्परामर्शकृतं तदन्तर्गतस्य क्रियात्वमिति कुतः क्रियाद्वयप्रत्ययः? न हि जातिगुणोपरक्तेषु द्रव्येषु तद्रूपभेद इति ।**

गुणविशेषात्मकस्यापि धात्वर्थस्य भावनामनुरञ्जयतः विशिंक्ष (ष) तः तद्विषयताप्रतीत्या तदाकारताप्रतीत्या तत्परामर्शकृतं तत्सम्बन्धकृतं तदन्तर्गतस्य तस्यां भावनायां लीनस्याविभागमिवापन्नस्य क्रियात्वम्, न तु क्रियाया इव स्वत एव । तत्र कुतः क्रियाद्वयप्रत्ययप्रसङ्गः? तत्र दृष्टान्ताभिधानम् — **न हीत्यादि** । यथा द्रव्यस्य गौरिति रूपं गोजात्युपरागात्, न स्वतः, यथा च शुक्लरूपं शुक्लगुणोपरागात्, न स्वतः; न च द्रव्यजात्योः गोरूपं भिद्यते, गुणद्रव्ययोश्च शुक्लं रूपम्, द्रव्यस्य स्वतोऽतद्रूपत्वात्, तथा धात्वर्थस्य स्वतोऽसाध्यत्वान्न साध्यरूपप्रत्ययप्रसङ्ग इति।

---

1. धात्वर्थस्य खलु भावना (क, ग.)
2. प्रतीतेः तस्यां प्रतीत्यां तत्परामर्श (ग.)
3. कृतः (क.)
4. भावनात्वं क्रियात्वमिति (क, ग.)
5. प्रत्ययप्रसङ्गः (क.); न्धितयैव च साध्यता (ख.)

[1] **भावनासम्बन्धितयैव तस्य साध्यता न [2] तत्सम्बन्धं विहन्ति, तदभावे [3] तस्याप्यभावप्रसङ्गात् । अतश्च करणसम्बन्धोऽप्युपपन्नः, [4] भावनाविषयत्व-मनुपयतः करणतायोगात् [5] साध्यताप्रतीतेः क्रियारूपापत्तेः ।**

सम्बन्धादेवेत्यादि व्याचष्टे — **भावनासम्बन्धितयैव तस्य साध्यता न तत्संबन्धं विहन्ति तदभावे तस्याप्यभावात् (वप्रसङ्गात्) इति ।** भावनासम्बन्धकृतं यत्साध्यत्वं धात्वर्थस्य न (तत्) तत्सम्बन्धं विहन्ति, तदभावे तस्याप्यभावप्रसङ्गादिति साध्यत्वस्यैवाभावप्रसङ्गादित्यर्थः ।

अतः करणसङ्गतिरित्येतद्व्याचष्टे — **अतश्च करणसम्बन्धोऽप्युपपन्नः, भावना-विषयत्वमनुपयतः करणतायोगात् साध्यताप्रतीतेः क्रियारूपापत्तेरिति ।** यतो भावनासम्बन्धकृतं धात्वर्थस्य साध्यत्वम्, अतः करणस्यापि करणान्तरेण काष्ठादिना सङ्गतिरुपपद्यते । यतो भावनाविषयतामनापन्नस्य करणता न विद्यते, तेनावश्यं धात्वर्थस्य भावनाकरणत्वाय भावनाविषयत्वमभ्युपगन्तव्यम् । भावनाविषयत्वे च साध्यतया क्रियारूपापत्तेः काष्ठादिकरणान्तरसङ्गतिरुपपद्यते । एवञ्च सति 'तेषामुत्पत्तौ' इति सूत्रं धात्वर्थाभिप्रायमुपपन्नं स्यादिति ।

यश्चात्र विक्लिदिपच्योः एकार्थत्वात् 'विक्लियन्ति पचन्तीति न विशेषः प्रकल्पते' इत्युक्ते कर्तृभेदादर्थभेद इति परिहारेऽभिहिते कर्तृलक्षणविकल्पेन

---

1. संवन्धेनैव (क.)
2. संवन्धमपि हन्ति (क.)
3. तस्या अप्यभावात् (क, ख.)
4. विषयतासुपयतः (ख); विषयत्वमनववत्वं (क.)
5. सत्ताप्रतीतेः (क.)

[1]प्रधानव्यापृतिर्यस्य धात्वर्थं [2]प्रत्यपीष्यते ।
स कर्तातः पचन्तीति विक्लिद्यन्तीति भिद्यते ॥ ५१ ॥

[3]न वै खल्वगुणतः धातुना अभिधीयमानव्यापारः कर्ता, येन प्रत्ययार्थः पर्यनुयुज्येत, अपि तु धात्वर्थं प्रत्यभिसंहितप्रधानव्यापारः,

धात्वभिहितव्यापार(त्वस्य) कर्तृलक्षणापादनेन कः प्रत्ययार्थ इति पर्यनुयोगः कृतः, तत्परिहारायाह —-

प्रधानव्यापृतिर्यस्य धात्वर्थं [4]प्रत्यपीष्यते ।
स कर्तातः पचन्तीति विक्लिद्यन्तीति भिद्यते ॥ इति ।

यदि धात्वभिहितव्यापारत्वं कतृलक्षणम्[5] स्यादेष दोषः । न च तत्कर्तृलक्षणम् । किं तर्हि? यस्य व्यापारः प्रत्ययेन धात्वर्थं प्रति प्रधानतया विशेष्यतया अभिधीयते स कर्तेति । अतो विक्लिद्यन्ति पचन्तीत्यर्थभेद उपपद्यते, क्वचित्तण्डुलादिव्यापारस्य धात्वर्थं प्रति प्रत्ययेनाभिधानात्, क्वचिद्देवदत्तव्यापारस्येति श्लोकस्यार्थः ।

अस्याविष्करणायाह — **न वै खल्वगुणतो धातुना अभिधीयमानव्यापारः कर्ता येन प्रत्ययार्थः पर्यनुयुज्येत, अपि तु धात्वर्थं प्रत्यभिसंहितप्रधानव्यापारः** इति ।

वै इति अक्षमां सूचयति । धात्वर्थः (र्थं) प्रत्यभिसंहितः विवक्षितः प्रधानतया यस्य व्यापारः स तथोक्तः ।

---

1. प्रधानं व्यापृतिः — पर्यनुयुज्येत ; अयं भागः न दृश्यते (क) मातृकायाम् ।
2. प्रसमीक्ष्यते (ग.)
3. न खलु (ख.)
4. प्रतीति । यदि (च.)
5. लक्षणं स्यात्, स्यादेषः (च.)

सर्वत्र धात्वर्थस्य कर्तृव्यापारं [1] लक्ष्यमभिधेयं वा प्रति विशेषणत्वात् । तेन विक्लिद्यन्तीति तण्डुलव्यापारस्य [2] ज्वलनावयवाभिघातजन्मनोऽवयवाश्रितस्य स्थाल्युदकाद्यनुसरणात्मकस्य धात्वर्थं प्रति प्रधानस्याभिधानम्, पचतीत्यत्र तु देवदत्तव्यापारस्याधिश्रयणादेः प्रत्ययेनाभिधानादर्थभेदः [3] कर्तृभेदश्च सिद्ध्यतीति न प्रत्ययार्थपर्यनुयोगावकाशः । [4] कथं पुनस्तुल्यार्थत्वात्पाचिना विक्लिदेः परेण प्रत्ययेन

धात्वर्थं प्रति भावनायाः प्राधान्यं दर्शयति — **सर्वत्र धात्वर्थस्य कर्तृव्यापारं लक्ष्यमभिधेयं वा प्रति विशेषणत्वादिति ।**

'किं करोति? पचति' इत्यादौ अभिधेयं प्रति विशेषणत्वम्, 'का क्रिया? पाकः' इत्यादौ लक्ष्यं प्रतीति प्रतिपत्तव्यम् । यथोक्तकर्तृलक्षणाभ्युपगमे सुपरिहरः पर्यनुयोग इत्याह — **तेन विक्लिद्यन्तीति तण्डुलव्यापारस्य ज्वलनावयवाभिघातजन्मनोऽवयवाश्रितस्य स्थाल्युदकाद्यनुसरणात्मकस्य (धात्वर्थं प्रति) प्रधानभूतस्याभिधानम् । पचन्तीति (तीत्यत्र तु) देवदत्तव्यापारस्ये (स्याधिश्रयणादेः प्रत्ययेनाभिधानादर्थ) त्यर्थभेदः कतृभेदश्च सिद्ध्यतीति न प्रत्ययार्थपर्यनुयोगावकाश** इति ।

विक्लिद्यन्तीत्यत्र तण्डुलव्यापारस्याभिधानम् । तस्य विशेषणं—ज्वलनावयवाभिघातजन्मन इति । ज्वलनस्यावयवैर्योऽभिघातो वेगवान्संयोगः तेन लब्धजन्मन इति । तस्य विशेषणान्तरम् — अवयवाश्रितस्येति । तण्डुलावयवाश्रितस्य अवयावयविनोरभेदात्तण्डुलव्यापारनिर्देशार्हस्य साक्षात्तण्डुलसम्बन्धिनो वा स्थाल्युदकाद्यनुसरणात्म-

---

1. अभिधेयं लक्ष्यं च (ग.)
2. ज्वलनाभिघातजन्मनोऽवयवाधेयं वा प्रति विशेषणत्वात् । श्रितस्य स्थाल्युद्धरणसंचरणात्मनो वा प्रधानभूतस्याभिधानात् पचतीति देवदत्तव्यापाराभिधानादर्थभेदः (ख.)
3. श्चास्तीति (क, ख.)
4. 'कथं' (ख.) नास्ति

तण्डुलव्यापार[1] एव प्रयोक्तृभिः विवक्ष्यते, न देवदत्तव्यापारोऽपि पचेः परेणै(णे)व ? प्रकृतीनां रूपभेदात्तुल्यार्थत्वेऽपि स्वार्थे प्रत्ययस्य शक्तिभेदात् ।

भार्या दारा जलान्याप एकार्थत्वेऽपि दृश्यते ।
प्रकृते रूपभेदेन प्रत्यययार्थो विशेषवान् ॥ ५२ ॥

कस्य धात्वर्थं प्रति प्रधानस्याभिधानम् । पचतीत्यत्र तु देवदत्तव्यापारस्याधिश्रयणादेः प्रत्ययेनाभिधानादर्थभेदः कर्तृभेदश्च सिद्ध्यतीति न प्रत्ययार्थपर्यनुयोगावकाश इत्यभिप्रायः ।

अत्र चोदयति — **कथं पुनस्तुल्यार्थत्वात्पाचिना विक्लिदेः परेण प्रत्ययेन तण्डुलव्यापार एव प्रयोक्तृभिर्विवक्ष्यते, न[2] देवदत्तव्यापारोऽपि पचेः परे(णै)णेवेति ।**

उत्तरमाह—**प्रकृतीनां रूपभेदात्तुल्यार्थत्वेऽपि स्वार्थे प्रत्ययस्य शक्तिभेदादिति** । प्रकृतीनां रूपभेदात्तुल्यार्थत्वेऽपि तत्परस्य प्रत्ययस्य शक्तिवैचित्र्यमुपपद्यते इति ।

अत्र दृष्टान्तमाह —

भार्या दारा जलान्याप एकार्थत्वेऽपि दृश्यते ।
प्रकृते रूपभेदेन प्रत्ययार्थो विशेषवान् ॥ इति ।

भार्या दारा इत्यत्र जलान्याप इत्यत्र च तुल्यार्थत्वेऽपि प्रकृतिरूपभेदात् प्रत्ययस्य बहुवचनस्यार्थो विशेषवानिति ।

---

1. एव विवक्ष्यते (ख, ग.)
2. व्यापारोऽपीति । अयमर्थः — पचिनातुल्यार्थोऽयं ………… परेण प्रत्ययेन तण्डुलव्यापार एव प्रयोक्तृभिर्विवक्ष्यते (छ.)

जलानीति प्रकृत्यर्थसमवायि तदेकार्थसमवायि वा बहुत्वं बहुवचनार्थः, तथा भार्या इति। आपो दारा इति [1] तु प्रकृत्यर्थावयवसमवायि तदाश्रयैकार्थसमवायि (वा), [2] प्रकृतिरूपभेदात्तदपेक्षत्वात्प्रत्ययस्याभिधानशक्तेः [3] ।

एतद्व्याचष्टे — **जलानीति प्रकृत्यर्थसमवायि तदेकार्थसमवायि वा बहुत्वं बहुवचनार्थः, तथा भार्या इति । आपो दारा इति तु प्रकृत्यर्थावयवसमवायि तदाश्रयैकार्थसमवायि वा प्रकृतिरूपभेदात् तदपेक्षत्वात्प्रत्ययस्याभिधानशक्तेरिति ।**

अयमर्थः — जानातीति (जलानीति) यद्बहुवचनं तत्प्रकृत्यर्थसमवायि बहुत्वमाचष्टे, व्यक्तिबहुत्वमाचष्टे इत्यर्थः । एतच्च व्यक्तिपक्षाङ्गीकरणेनोक्तम् । **तदेकार्थसमवायि वेति** । प्रकृत्येकार्थसमवायि वेत्यर्थः । इदन्तु जातेः प्रकृत्यर्थत्वमङ्गीकृत्योक्तम् । जातेर्व्यक्तिबहुत्वस्य च व्यक्तिषु समवायादेकार्थसमवायोऽस्तीति । अयमेव न्यायो भार्या इत्यत्रापि । आपो दारा इति त्व (इत्यत्र त्व) स्ति विशेषः । अत्र प्रकृत्यर्थावयवसमवायि बहुत्वं बहुवचनार्थः । एतदपि पूर्ववत् व्यक्तिशब्दार्थपक्षाङ्गीकरणेनोक्तम् । तदाश्रयैकार्थसमवायीति च जातिशब्दार्थपक्षाङ्गीकरणेनोक्तम् [4] । तस्य प्रकृत्यर्थस्य जात्यात्मन आश्रयो व्यक्तिः अवयवीत्यर्थः । तेन प्रकृत्यर्थाश्रयेणावयविना सहैकार्थसमवायि अवयवबहुत्वमर्थः । वा शब्दश्चात्र पूर्वत्र च व्यवस्थितविकल्पार्थः ।

ननु कथमवगम्यते आपो दारा इत्यत्रावयवबहुत्वं बहुवचनार्थः, न पुनरितरत्रेव व्यक्तिबहुत्वमिति? तथा प्रयोगदर्शनात् । एकस्मिन्नपि ह्यब्बिन्दौ आप इत्येव प्रयोगा दृश्यन्ते, एकस्यामपि च जायायां दारा इत्येव । तस्मादवयवबहुत्वमेव तत्र बहुवचनार्थः ।

---

1. 'तु' नास्ति (क.)
2. प्रकृतीनां रूप (क, ग.)
3. अभिधानरूपभेदाच प्रत्यक्षात् तथेहापि (क, ख.)
4. 'उक्तं' नास्ति (छ.)

तथेहापि पचिपरो धात्वर्थैकार्थसमवायिनं व्यापारं कर्मकर्तृविषयः प्रत्यय आह ; [1]भिन्नाश्रयं वा अन्यत्र । विक्लिदिपरस्तु प्रकृत्यै (त्यर्थै) कार्थसमवायिनमित्यनवद्यम्[2] ।

ननु सत्यपि प्रकृतिभेदे प्रत्ययरूपभेदाभावात्कथं तदभिधानशक्तिभेदः इत्याशङ्क्याह — **प्रकृतिरूपभेदादित्यादि** । तदपेक्षत्वात् प्रकृत्यपेक्षत्वात्प्रत्ययस्याभिधानशक्तेरित्यर्थः ।

दृष्टान्तोपदर्शितन्यायं दार्ष्टान्तिके योजयति — [3]**तथेहापि पचिपरो धात्वर्थैकसमवायिनं व्यापारं कर्मकर्तृविषयं (यः) प्रत्यय आह ; भिन्नाश्रय (यं वा) श्चान्यत्र । विक्लिदिपरस्तु प्रकृत्यै (त्यर्थै) कार्थसमवायिनमित्यनवद्यमिति ।**

कर्मकर्तृविषय इति । पच्यन्ते स्वयमेव तण्डुला इति धात्वर्थैकार्थसमवायी तण्डुलगतो व्यापारः प्रत्ययार्थः । पचतीत्यत्र तु प्रकृत्यर्थविक्लित्त्याश्रयातिरिक्तदेवदत्ताद्याश्रयम्[4] । विक्लिद्यन्तीत्यत्रापि प्रकृत्यर्थैकार्थसमवायीत्यर्थभेद[5] उपपद्यते इत्यभिप्रायः ।

यत्पुनरुक्तम् — 'कर्मणा च करोत्यर्थो व्याप्तोऽतस्तदयोगतः । तदभावः' इति ;

---

1. भिन्नप्रत्ययश्चान्यम् (क.)
2. इति निरवद्यम् (क, ख.)
3. तथेहापीत्यादि (च.)
4. देवदत्ताश्रयः (च.)
5. यीत्येवमर्थ (छ.)

अग्निं चिनुत इत्यत्र स्वं यज्ञं यजतीति च ।
दर्शनात्कर्मयोगस्य [1] नाभावस्तदभावतः ॥ ५३ ॥

धात्वर्थस्य हि [2] चयनस्येष्टकाः स्थलं वा [3] अव्यवधानात्कर्म, न व्यापारान्तरव्यवधीयमानो व्यभिचार्यग्निः । स तु भावनाकर्म । अग्निशब्दश्च

तत्राह —

अग्निं चिनुत इत्यत्र स्वं यज्ञं यजतीति च ।
दर्शनात्कर्मयोगस्य नाभावस्तदभावतः ॥

अग्निश्चिनुते इत्यादौ कर्मयोगस्य दर्शनात् कर्म [र्मा] भावहेतोरसिद्धत्वान्न करोत्यर्थस्याभावश्शक्यानुमान इत्यर्थः ।

एतद्विवृणोति— [4] **धात्वर्थस्येष्टकाः स्थलं वा अव्यवधानात् कर्म, न व्यापारान्तरव्यवधीयमानो व्यभिचार्यग्निः । स तु भावनाकर्मेति ।**

अयमाशयः — अग्निमिति द्वितीयया अग्नेः कर्मत्वं गम्यते । तच्च भावनाकर्मत्वम्, चयनधात्वर्थस्यान्यकर्मकत्वात् इष्टकाः चयनस्य कर्म स्थलं वा । यदेष्टकादि (तिरिक्तं) स्थलं नाम द्रव्यं न जायत इति पक्षः, तदा [5] इष्टका एव कर्म । द्रव्यजन्मपक्षे स्थलमिति व्यवस्थितो विकल्पः । तत्र हेतूक्तिः **अव्यवधानादिति** ।

अव्यवधानं हि भवतीष्टकानां स्थलस्य वा चयने, न त्वग्निः चयने कर्म भवितुमर्हति, [6] व्यापारान्तरव्यवहितत्वाद्व्यभिचाराच्च । भवति हि व्यापारान्तरमन्तरा

---

1. तदभावकः (क.)
2. 'हि' नास्ति (ख.)
3. धानान्नव्यापार (क, ख.)
4. धात्वर्थैत्यादि (च.)
5. इष्टका हि चयनस्य कर्म (छ.)
6. व्यवहितत्वात् अतो भावनाकर्मैवाग्निः । भावनायामन्तराचयनमग्निश्च (छ.)

न स्थलवचनः अपि तु ज्वलनवचनः । एवं ह्युक्तम् — ‘अत्र ह्येष प्रसिद्धः’ [1] इति । ‘स्वं यज्ञं यजति’ [2] इति तु न भावनातोऽन्यत्र कर्मत्वमिति [3] वर्णितम् ।

चयनमग्निं च स्थलस्थापनादिलक्षणम् । व्यभिचरति चाग्निश्चयनम् । सत्यपि तस्मिन्नसति व्यापारान्तरेऽभावात् । अतो भावनाकर्मैवाग्निः । भावनायाश्च चयनोपक्रमस्थलस्थापनादि-पर्यन्तायाः पूर्वापरीभावेनैकस्या एवावस्थानं (नात्) न व्यापारान्तरव्यवधानं व्यभिचारो वा अग्नेरिति ।

नन्वग्निशब्दस्य स्थलवचनत्वान्न व्यवधानं व्यभिचारो वा अग्नेरित्याशङ्क्याह — [4] **अग्निशब्दो न स्थलवचनः अपि तु ज्वलनवचन इति ।**

तत्र भाष्यमुदाहरति — **एवं ह्युक्तं—अत्र ह्येष प्रसिद्ध इति** । तस्मादग्निश्चिनुते इति अयमर्थः — स्थलं चिन्वंश्चयनेनाग्निं भावयतीति । स्वं यज्ञं यजतीत्यादि व्याचष्टे — **स्वं यज्ञं यजतीति तु न भावनातोऽन्यत्र कर्मत्वमिति वर्णितमिति ।**

यज्ञमिति द्वितीयानिर्दिष्टं यज्ञस्य यत्कर्मत्वं न तद्भावनातोऽन्यत्र धात्वर्थे, अपि तु भावनायामेव, स्वात्मनि क्रियाकारकभावानुपपत्तेः एकस्यैव यज्ञस्य क्रियात्वं कर्मत्वं च नोपपद्यत इति । एतच्च वर्णितं पुरस्तात् — [5] ‘तदेव तस्य करणं न वै कर्म च कल्पते । भावनां संगिरन्त्येते(न्तेऽतो) धात्वर्थव्यतिरेकिणीम्’ इत्यत्र । तथा महाभाष्येऽपि

---

1. इति भाष्यकारेण (ग, घ, ङ.)
2. यजतीति न (क, ख.)
3. दर्शितम् (क, ख, ग.)
4. अग्निशब्देत्यादि (च.)
5. तदेवेत्यादिना (च.)

तथा महाभाष्ये कर्मद्वयसम्बन्धो विक्लित्तेर्भावनाभेदेनैव[1] दर्शितः — 'इह तावत्तण्डुलानोदनं पचतीति, द्व्यर्थः पचिः, तण्डुलान्विक्लेदयन् ओदनं निर्वर्तयति' इति[2] ।

प्रयोजकक्रियामाहुः कर्तृव्यापारगोचराम् ।
कर्तृव्यापारविषयो धातोरर्थो विवक्ष्यते ॥ ५४ ॥

विक्लित्ति (त्तेः) भावनाभेदेन कर्मद्वयसम्बन्धो दर्शित इत्याह — **तथा महाभाष्ये कर्मद्वयसम्बन्धो विक्लित्ति (त्तेः) भावनाभेदेन दर्शित इति ।**

भाष्यग्रन्थम् उदाहरति — **इह तावत्तण्डुलानोदनं पचतीति, द्व्यर्थः पचिः, तण्डुलान् (विक्लेदयन्) ओदनं निर्वर्तयतीति ।** 'कर्तुरीप्सिततमं कर्म' इत्यत्रोक्तम् — 'अथेह कथं भवितव्यम्, तण्डुलानोदनं पचतीति आहोस्वित् तण्डुलानामोदनं पचतीति(इति) प्रश्नस्योत्तरमुक्तम् — 'उभयथा भवितव्यम् इह तावत्' इयादि । तत्र विक्लित्तेः तण्डुलाः कर्म भावनायास्त्वोदन इति दर्शितम् । ओदनस्यैव कर्मत्वे तण्डुलानामिति स्यात्, न तण्डुलानिति । पचिश्च व्यर्थः । निर्वर्तयतीति च स्यात् । तण्डुलानामेव कर्मत्वे ओदनमिति व्यर्थः (र्थम्) । तस्मादुभयोस्तण्डुलौदनयोरुभयत्र विक्लित्तौ भावनायां च कर्मत्वमित्यर्थः । अत्र पूर्वपक्षे सिद्धान्ते चायं विशेषः — पूर्वपक्षे तु धातुरेव सर्वव्यापारवाची । सिद्धान्ते तु धातुरेकत्र व्यापारे वर्तते परस्मिन्प्रत्ययः । अपरोऽपि विशेषः — स्वत एव साध्यात्मा धात्वर्थः क्रियारूपः कारकैः सम्बध्यत इति पूर्वपक्षे । सिद्धान्ते तु स्वयमक्रियारूपगुणविशेषात्मा प्रत्ययाभिधेयक्रियोपरागादापन्नक्रियाभावः कारकैः संबध्यते इति ।

यत्पुनरुक्तं 'तुल्यार्थत्वं भावयति भवतीति प्रसज्यते' इति, तत्राह —

प्रयोजकक्रियामाहुः कर्तृव्यापारगोचराम् ।
कर्तृव्यापारविषयो धातोरर्थो विवक्ष्यते ॥

---

1. संबन्धाद्विक्लित्तेः (ख.)
2. यद्यपि द्व्यर्थः पचिरित्युक्तम् । द्वौ तावद्व्यापारौ कर्मान्वयगोचरौ दर्शितौ । तत्रोदनं निर्वर्तयतीति यथा प्रत्ययार्थस्तथा प्रतिपादितम्' — इत्यधिकं दृश्यते (क, ख, ग) मातृकासु.

[1]स्वव्यापारे सर्वस्य (कर्तृत्वात् अन्यथा कारकत्वायोगात्) नियोगात्कर्तृ-व्यापारविषयः प्रेरणादिः प्रयोजककर्तृव्यापारो णिजर्थः, धात्वर्थविषयः कर्तृव्यापारस्तिङर्थ इति न भवति भावयत्योस्तुल्यार्थतेति[2]।

[3]तदेवं भावनार्थत्वादाख्यातप्रत्ययस्य हि।
यागेन भावयेत्स्वर्गमित्यर्थः [4]शब्दनिर्मितः ॥ ५५ ॥

भावयतीत्यत्र प्रयोजकव्यापारं णिजाचष्टे, भवतीत्यत्र तु कर्तृव्यापारं तिङिति न तुल्यार्थत्वप्रसङ्गः। कः पुनः प्रयोजकव्यापारः? को वा कर्तृव्यापारः इति?। उच्यते — कर्तृव्यापारविषयः प्रयोजकव्यापारः, धात्वर्थविषयः कर्तृव्यापार इति। एतदुक्तं भवति — भवने व्याप्रियमाणो घटो णिजर्थस्य प्रयोजकव्यापारस्य विषयः, तिङभिधेयस्य घटकर्तृकस्य व्यापारस्य तदेकार्थसमवायी भवनं नाम धात्वर्थो विषय इति।

एतदेवोपपादयति—[5]**स्वव्यापारे सर्वस्य कर्तृत्वात्, अन्यथा कारकत्वायोगात् कर्तृव्यापारविषयः (प्रेरणादिः) प्रयोजकव्यापारो णिजर्थो धात्वर्थविषयः कर्तृव्यापार-स्तिङर्थ इति न भवति भावयतीति (यत्योस्तु) तुल्यार्थतेति।** स्वव्यापारे सर्वस्येत्यनेनासतो घटस्य कर्तृत्वाशङ्कां परिहरति। नात्यन्तमसत्त्वं घटस्योत्पत्तेः प्रागपीत्यभिप्रायः। तस्मादेवमुक्तेन न्यायेन णिजर्थस्य तिङर्थस्य व्यापारस्य (च) भेदान्नभवति भावयतीति तुल्यार्थताप्रसङ्ग इति।

इदानीं धात्वर्थातिरिक्तप्रत्ययाभिधेयभावनासमर्थनस्य फलं दर्शयति —

[6]**तदेवं भावनार्थत्वादाख्यातप्रत्ययस्य हि।
यागेन भावयेत्स्वर्गमित्यर्थः शब्दनिर्मितः ॥**

---

1. स्वव्यापारविषयः प्रयोजकव्यापारो णिजर्थः (क, ख.)
2. भावयतीति तुल्यार्थत्वम् (क, ख.)
3. तदित्थं (क, ख.)
4. शब्दगोचरः (क, ख.)
5. स्वव्यापारेत्यारभ्य तुल्यार्थतेत्यन्तेन (च.)
6. तदेवमित्यादिना (च.)

[1] **तत्कथम् ?**

अपेक्षितत्वाद्भाव्यस्य कामशब्दा हि तत्पराः ।
विशेषणप्रधानत्वं दण्डीत्यादिषु दर्शितम् ॥ ५६ ॥

[2] **यद्यपि स्वर्गादयः पुरुषविशेषणत्वेन श्रूयन्ते, तथापि कामश्रुतयः तत्प्रधानाः, 'दण्डी प्रैषानन्वाह', 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इति**

ननु स्वर्गस्य भाव्यताप्रतीत्यभावात् सत्यामपि प्रत्ययवाच्यायां भावनायां नैषोऽर्थः सिद्धयति इत्यभिप्रायेण पृच्छति — **तत्कथमिति** ।

उत्तरमाह — **अपेक्षितत्वाद्भाव्यस्य कामशब्दा हि तत्पराः ।**
विशेषणप्रधानत्वं दण्डीत्यादिषु दर्शितम् ॥

अयमर्थः — यस्मात्कामि(म)शब्दाः फलसमर्पणपराः, भाव्यस्य भावनापेक्षि-(त)त्वात्, तस्माद्यागेन भावयेत्स्वर्गमित्येषोऽर्थः शब्दनिर्मित इति ।

तदेतद्व्याचष्टे—**यद्यपि स्वर्गादयः पुरुषविशेषणत्वेन श्रूयन्ते तथापि कामि(म) श्रुतयस्तत्प्रधानाः, 'दण्डी प्रैषानन्वाह' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इति दर्शनादिति ।** यद्यपि 'स्वर्गकामो यजेत' इत्यादौ स्वर्गादीनां पुरुषविशेषणतया श्रवणम्, न स्वप्रधानतया, तथापि कामश्रुतयस्तत्प्रधानाः, फलस्य भावनया अपेक्षितत्वात् आकाङ्क्षा-निबन्धनत्वाच्च सम्बन्धस्य । दृश्यते च विशेषणप्रधानत्वं 'दण्डी प्रैषानन्वाह' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादौ, विशेषणमात्रस्याप्राप्तत्वेन विधानार्हत्वात्, प्रैषानुवचनस्य 'मैत्रावरुणः प्रैषानन्वाह' इति प्राप्तत्वात्, ऋत्विक्प्रचरणस्यापि विकृतावतिदेशतः प्राप्तत्वाद्विधानानर्हत्वात् इति ।

---

1. तत्कथं नास्ति (क, ख.) ; कथं कर्मेतिचेत् (ग.)
2. यद्यपि च (क, ख.)

दर्शनात् । कुतः ? [1] भावना (न) या भाव्यस्यापेक्षितत्वात् स्वर्गादीनां च काम्य-(मान) तया भाव्यत्वप्रतीतेः [2] द्वितीयान्तप्रयोग इव तयापि [3] इष्टत्वप्रतिपादनात् । तेन पुरुषप्रतीतिः [4] स्वर्गकामपदेऽनुवादः । [5] स्वर्गमित्येतावद्विधित्सितम्,

कुत इति पूर्वाभिप्रायेण पृच्छति । उत्तरमाह — [6] **भावना (न) या भाव्यस्यापेक्षितत्वात् स्वर्गादीनां काम्यमानतया भाव्यत्वप्रतीतेरिति ।** भावना हि भाव्यप्रचर(प्रवण)णस्वभावा पदान्तरलभ्यं विशेषमाकाङ्क्षति। स्वर्गादयोऽपि कामनाविषयतया अवगतसाध्यभावाः कमपि भावनाविशेषं पदान्तरलभ्यमभिलषन्ति। ततश्चाकाङ्क्षासत्तियोग्यताभिर्भवति सम्बन्धावगम इति । **द्वितीयान्तप्रयोग** इवेति दृष्टान्तः । स्वर्गमिति द्वितीयान्तप्रयोगे यथा स्वर्गस्य साध्यत्वं गम्यते तथेहापीत्यर्थः ।

द्वितीयान्तप्रयोगविषयेण कामनाविषयस्य साम्यं दर्शयति — **तयापीष्टत्वप्रतिपादनादिति ।** तयापि द्वितीयया इष्टत्वमीप्सिततमत्वं प्रतिपाद्यते। अपिशब्देन स्वर्गकामपदेनापि इष्टत्वप्रतिपादनात्तुल्यतेत्यर्थः ।

यस्माच्च भाव्यसमर्पणपरं स्वर्गकामपदम्, तस्मात्पुरुषस्य कामयितुः प्रतीतिरनुवादः, भावनयैव भावकस्य पुरुषस्यावगतत्वादित्येतदाह — [7] **तेन पुरुषप्रतीतिः स्वर्गकामपदेऽनुवादः । स्वर्गमित्येतावद्विधित्सितम्, भाव्यविशेषपरत्वात् इति ।**

---

1. भावनायां (ग.)
2. द्वितीयाप्रयोग (क, ख.)
3. इष्टप्रतिपादनात् (ख.)
4. कामादिपदे (क, ख.)
5. विधित्सितः (क)
6. भावनाया इत्यादि (च.)
7. तेनेत्यादि (च.)

भाव्यविशेषपरत्वात्, धात्वर्थस्य[1] श्रौतस्यापि विधिज्ञानविरोधादकर्मत्वात्[2]। करणत्वेऽपि श्रुत्यनुग्रहादविरोधात्, शास्त्राधीनत्वाद्योग्यायोग्यत्वयोरज्ञानात्,

ननु च धात्वर्थ एव श्रौतत्वाद्भाव्यो भविष्यति, समानपदोपादानात् सन्निहिततरो हि धात्वर्थः, स्वर्गस्तु पदान्तरसन्निधानाधीनसम्बन्धः । अतः प्रथमतरं धात्वर्थः साध्यतया सम्बध्येतेत्याशङ्क्याह — **धात्वर्थस्य च श्रौतस्यापि विधिज्ञानविरोधादकर्म[क]त्वात् इति।** यद्यपि श्रौतो धात्वर्थः, वाक्यलक्षणश्च स्वर्गः, तथापि विधिविज्ञानविरोधान्न भाव्यो भवितुमर्हति। विधिर्हि श्रेयस्साधना (नता) त्मा तिङभिधेयभावनासम्बन्धी प्रतीयमानो न धात्वर्थस्य भाव्यत्वेऽवकल्पते, तस्याश्रेयोरूपत्वात् । स्वर्गभाव्यत्वे तु न श्रेयस्साधना (नता)त्मविधिविज्ञानं विरुद्ध्यते, तस्य श्रेयोरूपत्वादिति ।

नन्वेवं सति धात्वर्थस्य श्रौतत्वं विरुद्ध्यत इत्याशङ्क्याह — [3]**करणत्वेऽपि श्रुत्यनुग्रहादविरोधादिति** । करणस्यापि भाव्यत्वात्प्रच्युतस्यापि भावनामनुरञ्जयतः करणत्वमुपेयते । ततश्च करणत्वेनाङ्गीकृते धात्वर्थे श्रुतिर्न विरुद्ध्यते, अन्वयमात्रेणापि भावनासम्बन्धश्रुत्युपपत्तेः तद्विरोधाभावादिति ।

ननु नाकाङ्क्षासन्निधिभ्यामेव केवलाभ्याम् अन्तरेण योग्यतामन्वपेता (न्वयो) भवति, योग्यत्वं च धात्वर्थस्य भावनायां करणत्वेनान्वये नास्ति, अनिष्पन्नत्वात्, निष्पन्नस्यैव च करणत्वोपलम्भादित्याशङ्क्याह — **शास्त्राधीनत्वाद्योग्यत्वस्य अयोग्यत्वाज्ञानादिति** । यागादीनां स्वर्गादिसाधनभावे यद्योग्यत्वज्ञानम् [न] तच्छास्त्राधीनम्, न प्रमाणान्तरेण ज्ञातुं शक्यते अस्ति नास्तीति वा । यत्त्वनिष्पन्नस्य करणत्वा (त्व) न्नोपपद्यत

---

1. धात्वर्थस्य च (क, ख.)
2. अकर्म(क)ता (क, ख.)
3. करणत्वेऽपीत्यादि (च.)

(योग्यत्वस्य अयोग्यत्वाज्ञानात्) सर्वफलभावनानां[1] **च धात्वर्थविशेषसाधनत्वात् ।**

स्यान्मतम् — स्वर्गादिविशेषणपरत्वेऽपि[2] **गुणभावः स्वर्गादेः स्यात् । न,**[3] **भाव्यस्य प्रथममपेक्षणात्, साधनेषु चोपचारादिच्छायाः ।**

इति, तदसत्; निष्पन्नस्य करणत्वाभ्युपगमात् । निष्पद्यते हि यागः कर्तृव्यापारेण । निष्पादितस्य च तस्यापूर्वद्वारेण फलसाधनभाव इति नायोग्यत्वज्ञानमस्ति । न चैतदप्रसिद्धं लोक इत्याह — **सर्वफलसाधनानां (भावनानां) धात्वर्थविशेषसाधनत्वादिति ।** लौकिकानामपि भावनानामेवंभावान्नेहास्त्यनुपपत्तिरित्यर्थः ।

तत्र शङ्कते — **स्यान्मतं स्वर्गादिविशेषणपरत्वेऽपि गुणभावः स्वर्गादेः स्यादिति ।** स्वर्गकामादिपदानां दण्डिलोहितोष्णीषादिपदवत् सत्यपि विशेषणपरत्वे स्वर्गादीनां प्राधान्यं दुर्लभम्, गुणभावेनैव प्रतीतेः । असति च प्राधान्ये भाव्यत्वं दुरुपपादम्, भाव्यप्रधानत्वाद्भावनाया इति ।

परिहरति — **न, भाव्यस्य प्रथममपेक्षणादिति** । भाव्यं प्रथममपेक्षते भावना, तत्प्रवणस्वभावत्वात्, पश्चात्साधनं तदनुग्राहकं च । अतो भावनया भाव्यस्य प्रथममपेक्षितत्वात् अपेक्षानिबन्धनत्वाच्च सम्बन्धस्य पुरुषविशेषणस्यापि स्वर्गादेः भाव्यत्वेनैव सम्बन्धावगमात् प्राधान्यमिति ।

इतश्च भाव्यत्वेनान्वयः स्वर्गादीनामित्याह — **साधनेषू(षु चो) पचारादिच्छाया इति ।** इच्छाविषयत्वं स्वर्गादीनामवगम्यमानं भाव्यत्वे सत्यनुपचरितं स्यात्, साधनत्वे त्विच्छाया उपचारप्रसङ्गादिति ।

---

1. 'च' नास्ति (ग.)
2. विशेषणवत्त्वेऽपि गुणभाव एव (क, ख.)
3. 'न' नास्ति (क.)

ननु न [1] भाव्यप्रतिपत्तिप्रधानाः [2] कामश्रुतयः, अपि तु नियोज्यविशेष-[3] प्रतिपादनपराः । अन्यथा कस्यायमुपदेशः, को नियुज्यते, कस्येदं [4] कर्तव्यम्, इत्यज्ञानात्सापेक्षमसमाप्तमप्रतिपत्तिकरमेव [5] शास्त्रं स्यात् ।

नैतत्सारम्, यतः —

अत्र कश्चिन्मीमांसकः प्रत्यवतिष्ठते — **ननु न भाव्यप्रतिपत्तिप्रधानाः कामि (म) श्रुतयः अपि तु नियोज्यविशेषप्रतिपादनपराः अन्यथा कस्यायमुपदेशः को नियुज्यते कस्येदं कर्तव्यम् इत्यज्ञानात्सापेक्षमसमाप्तमप्रतिपत्तिकरमेव शास्त्रं स्यादिति ।**

अयमाशयः — न फलसमर्पणपराः स्वर्गकामादिश्रुतयः, अपि तु नियोज्य-विशेषणा(षा)र्पणपराः । असमर्पिते हि नियोज्यविशेषे कस्यायमुपदेश इति न ज्ञायते । यस्यायमुपदेशः स नियोज्यः, यश्च नियोज्यः स ममेदं कर्तव्यमिति प्रतिपद्यते; (अ) प्रतिपन्ने च नियोज्ये कर्तव्यमिति प्रतिपत्तुरभावादप्रतिपात्तिकरं शास्त्रमनर्थकं स्यात् इति ।

अथवा दर्शनभेदापेक्षयेदं व्याख्येयम् । कस्यायमुपदेश इति उपदेशविधिवादिन मतमाश्रित्योक्तम् । को नियोज्य इति नियोगविधिवादिनाम् । कस्येदं कर्तव्यमिति कर्तव्यताप्रतिभाविधिवादिनामिति ।

एतन्निराकरोति — **नैतत्सारम्, (यतः —)**

---

1. भाव्यभेद (ग.)
2. पत्तिपराः (क, ख.)
3. प्रातिपात्ति (क.)
4. कर्मेत्यज्ञानात् (क); कर्तव्यमित्यपरिज्ञानात् (ग.)
5. मपरिसमाप्तम् (क, ग.)

प्रतीयते [1] नियोगोऽर्थात्समर्थस्य फलार्थिनः ।
अन्यथा ह्यसमर्थानां दुर्वाराधिकृतिर्भवेत् ॥ ५७ ॥

[2] योऽपि हि शब्दान्नियोज्यविशेषावसायं मन्यते सोऽपि [3] नियोज्यविशेषप्रतिपत्तौ सामर्थ्यमुपैति । अन्यथा शब्दवशेन शक्तिकल्पनायामन्धादीना- [4] मप्यत्रार्थेऽधिकारः स्यात् । सत्यपि चेच्छब्दे [5] सामर्थ्यमुपाश्रीयते नियोज्यावगमे तदसत्येवास्तु । तस्माद्यो नियोगार्थं प्रतिपत्तुं तद्विषयं चानुष्ठातुं समर्थः फलार्थी च स नियोज्यः, असमर्थस्यानर्थिनोऽशक्येऽनभिलषिते(वा) [6] यागे प्रवर्तनायोगात् ।

प्रतीयते नियोगोऽर्थात्समर्थस्य फलार्थिनः ।
अन्यथा ह्यसमर्थानां दुर्वाराधिकृतिर्भवेत् ॥ इति ।

अयमर्थः — अन्तरेणापि शब्दमर्थादेव साङ्गप्रधानप्रयोगसमर्थः फलार्थी च प्रतीयते । अन्यथा सामर्थ्यानपेक्षणेऽसमर्थानामन्धबधिरादीनामधिकारो दुर्वारः स्यादिति कामश्रुतीनां भाव्यविशेषार्पणपरत्वेऽपि न कश्चिद्दोष इति ।

एतद्विवृणोति—योऽपि शब्दान्नियोज्यविशेषं(षावसायं) मन्यते सोऽपि नियोज्यविशेषप्रतिपत्तौ सामर्थ्यमुपैति । अन्यथा शब्दवशेन शक्तिकल्पनायामन्धादीनामप्यत्रार्थेऽधिकारः स्यात् । सत्यपि चेच्छब्दे सामर्थ्यमुपाश्रीयते नियोज्यावगमे तदसत्येवास्तु । तस्माद्यो नियोगार्थं प्रतिपत्तुं (तद्विषयं चानुष्ठातुं) समर्थः फलार्थी च स नियोज्यः, असमर्थस्यानर्थिनोऽशक्येऽनभिलषिते वा (यागे) प्रवर्तनायोगात् इति ।

1. नियोगार्थात् (क, ख.)
2. योऽपि हि शब्दो (क, ख.)
3. विशेषावगमे (ख.)
4. अनिवार्योऽधिकारः (क, ख.)
5. सामर्थ्यमुपैति तदसत्येवास्तु (क, ख.)
6. लषिते चार्थे (ख.)

किञ्च —

अतत्परत्वे [1] फलता (स्वर्गादे) पश्वादेर्नास्ति शब्दतः ।
न सामर्थ्यादनुष्ठानं नियोगैकनिबन्धनम् ॥ ५८ ॥

[2] यदि स्वर्गकामादिश्रुतयो न फलभेदाधिगमनपराः न शब्दवती फलता स्वर्गादीनाम्; नापि [3] सामर्थ्यतः, अनुपपद्यमानाभावात् ।

अयमभिप्रायः — शब्दान्नियोज्यविशेषलाभं मन्यमानेनापि सामर्थ्यमपेक्षितव्यमन्धबधिराद्यधिकारनिवारणाय । अपेक्षितं चेत्सामर्थ्यं तदेवानपेक्ष्य शब्दं फलार्थितासहायं अधिकारम (कारा) ध्यवसायकारणं सम्पद्यते । अतोऽन्यत एव लभ्यमानत्वान्नियोज्यस्य न शब्दापेक्षेत्यन्यलभ्यत्वादधिकारिणो न स्वर्गकामादिपदसमर्पणीयता युक्तेत्युक्तम् ।

इदानीं फलस्या(न)न्यलभ्यत्वात् तत्समर्पणीयत्वमवश्याश्रयणीयमित्याह —

किञ्च —

अतत्परत्वे फलता(स्वर्गादे)पश्वादेर्नास्ति शब्दतः ।
न सामर्थ्यादनुष्ठानं नियोगैकनिबन्धनम् ॥ इति ।

अयमभिप्रायः — अतत्परत्वेऽफलपरत्वे नियोज्यविशेष[ण]परत्वे कामश्रुतीनाम् पश्वादीनां फलता न शाब्दी, शब्दस्यान्यपरत्वात् । अथ सामर्थ्यात्फलसम्बन्धः सिद्ध्यति नियोज्यविशेष इवास्मत्पक्षे, तदपि न, फलकल्पनया विना अनुपपद्यमानस्य कस्यचिदभावात् । अनुष्ठानं नोपपद्यते फलेन विनेति चेत् — न, नियोगनिबन्धनत्वादनुष्ठानस्य नैमित्तिकनिषेधाधिकारयोरिवेति ।

श्लोकार्थाविष्करणायाह — यदि स्वर्गकामादिश्रुतयो न फलभेदाधिगमनपराः न शब्दवती फलता स्वर्गादीनाम्, नापि सामर्थ्यतः अनुपपद्यमानाभावात् इति ।

1. पश्वादेः फलता (क, ख.)
2. यदि न फलपराः स्वर्गकामादिशब्दाः (क, ख.)
3. सामर्थ्यतः । अन्यथा अनुष्ठानमुयुक्तमिति चेत् (ग.)

अन्यथा (पि) नियुज्यमाना (न) भावात् । अनुष्ठानमयुक्तमिति चेत् — न, तस्य नियोगमात्रायत्तत्वाभ्युपगमात् । एकवाक्यत्वमिति चेत् —

अयमाशयः — यदि फलविशेषसमर्पणपराः न स्युः स्वर्गकामादिश्रुतयः तदा स्वर्गादीनां फलता न सिद्ध्यति । न तावत् शब्दतस्तत्सिद्धिः, शब्दस्य नियोज्यविशेष[ण] समर्पणतया फलपरत्वाभावात् । नापि सामर्थ्यतः तत्सिद्धिः, स्वर्गादिफलत्वेन विना अनुपपद्यमानस्य कस्यचिदभावात् इति ।

ननु नियुज्यमानत्वं स्वर्गकामादेः अन्यथा नोपपद्यत इत्याशङ्क्याह — **अन्यथा (पि) नियुज्यमाना (न) भावादिति**। अन्यथा फलकल्पनेन विना नियुज्यमाना-(न)भावात् । विनापि फलकल्पनेन नियुज्यमाना दृश्यन्ते भवत्पक्षे नित्यनिषेधाधिकारयोरि-[वे]त्यभिप्रायः ।

तत्र शङ्कते — **अनुष्ठानमयुक्तमिति चेत् इति**। नियुज्यमानत्वमनुपपन्नं माभूत्, अनुष्ठान[त्व]मनुपपन्नं इति चेदिति ।

परिहरति — **न, तस्य नियोगमात्रायत्तत्वाभ्युपगमादिति** । नियोगवादिना हि नियोगमात्रायत्तमनुष्ठानमभ्युपगम्यते नित्याधिकारे, न फलमपेक्ष्यते । तथेहापि स्यादि-त्यभिप्रायः ।

पुनः शङ्कते — **एकवाक्यत्वमिति चेदिति** । स्वर्गकामो यजेतेति पदाना-मेकवाक्यत्वमनुपपन्नं स्वर्गादीनां फलत्वेन विनेति चेदित्यर्थः ।

---

1. अनुष्ठानमन्यथा नोपपद्यत इति चेत् (क, ख॰)

[1] को विरोधः? अन्यदिच्छति अन्यत्करोतीति स्वर्गकामो यागं कुर्यादित्ययमेव विरोधः (इति चेत्) अत एव तर्हि न पुरुषविशेषपराः स्वर्गकामादिश्रुतयः, [2] फलपरास्सन्तु ।

अपि च —

नियोगपरतन्त्रस्य पुरुषस्यान्यदिच्छतः ।
[3] क्रियान्यस्य विरुद्धेति न नियोगप्रधानता ॥ ५९ ॥

उत्तरमाह — **को विरोध इति** । एकवाक्यत्वे विरोधो नास्तीत्यभिप्रायः ।

विरोधमाशङ्कते — **अन्यदिच्छति अन्यत्करोतीति स्वर्गकामो यागं कुर्यादित्ययमेव विरोध (इति) चेदिति** । अन्यदिच्छता अन्यदनुष्ठातव्यमित्य (न) न्विताभिधानमशक्यक्रियम्, कृतीच्छयोरेकविषयत्वनियमात् । यदि च यागादीनां स्वर्गादिसाधनत्वं भवेत् स्वर्गा(यागा)दिविषया कृतिः इष्यमाणस्वर्गादिविषयापि भवत्येवेति कृतीच्छयोरेकविषयत्वोपपत्तेः स्वर्गकामो यजेतेत्येकवाक्यत्वमुपपद्यत इति ।

परिहरति — **अत एव तर्हि नियोज्यविषयपराः श्रुतयः (न पुरुषविशेषपराः स्वर्गकामादिश्रुतयः) फलपरास्सान्त्विति** ।

अयमभिप्रायः — यस्मादुक्तेन न्यायेन फल(पर)त्वेन विनैकवाक्यत्वानुपपत्तिः अत एव तर्हि एकवाक्यत्वोपपादनाय फलपरास्सन्तु स्वर्गकामादिश्रुतयो न नियोज्यविशेषसमर्पणपराः । तत्परत्वे त्वदुक्तेन न्यायेनैकवाक्यताविरोधात् इति ।

अपरमप्यनिष्टप्रसङ्गमापादयति — **अपि च —**

नियोगपरतन्त्रस्य पुरुषस्यान्यदिच्छतः ।
क्रियान्यस्य विरुद्धेति न नियोगप्रधानता ॥

---

1. अत्राविरोधः (क.)
2. फलपरास्तु (ग.)
3. अन्याक्रिया विरुद्धेति (ग.)

अन्यदिच्छति अन्यत्करोति [1] इति विरोधं वदतो नियोगप्राधान्यं हीयते, फलार्थिताहेतुत्वान्नियोगस्य । दृश्यते च [2] नियोगसामर्थ्यादन्यदपीच्छतामन्यक्रिया परतन्त्राणाम् । भाव्यस्यैव सतो विशेषणत्वमिति चेत् —

अयमर्थः — नियोगपरतन्त्रो हि भवत्पक्षे पुरुषः प्रवर्तते । अत एव च तत्प्रधानः । तस्यान्यदिच्छतोऽन्यस्य क्रिया विरुद्धेति वदत इच्छापारतन्त्र्याभ्युपगमात् इष्यमाणफलप्राधान्यमनिष्टमापद्यते, नियोगप्राधान्यं चेष्टं हीयते इति ।

एतद्व्याचष्टे — **अन्यदिच्छति अन्यत्करोतीति (विरोधं) वदतो नियोगप्राधान्यं हीयते फलार्थिताहेतुत्वान्नियोज्यस्य (गस्य) इति** । फलार्थिताहेतुत्वान्नियोज्यप्रवृत्तेः फलप्राधान्यमपरिहार्यम् प्रधान्येन कृतिव्याप्यत्वं फलस्यैव स्यात्, न नियोगस्येति भावः ।

अन्यदिच्छतोऽन्यक्रियाविरोधमभ्युपेत्योक्तम् । इदानीं विरोध एव नास्तीत्याह — **दृश्यते च नियोगसामर्थ्यादन्यदपीच्छतां अन्यक्रिया परतन्त्राणामिति**। स्वाम्यादिपरतन्त्राणां भृत्यादीनां अन्यदिच्छतामपि तन्नियोगवशात् अन्यक्रिया दृश्यते । यथा भोक्तुकामेषु भृत्येषु स्वामी नियुङ्क्ते —‘भोक्तुकामा युध्यन्ताम्’ इति । तदा भृत्या भोजनमकृत्वा युद्धे प्रवर्तन्ते । तस्मादन्यदिच्छत्यन्यत्करोतीति न विरुद्धमित्यर्थः ।

पुनः शङ्कते — **भाव्यस्यैव सतो विशेषणत्वमिति चेत् इति** ।

अयमाशयः — भाव्यस्यैव सतः स्वर्गादेः यन्नियोज्यविशेषणत्वम्, तत्स्वर्गादेः फलत्वमन्तरेण नोपपद्यत इति ।

---

1. इति वदतो (ग, घ, ङ, च, छ.)
2. सामर्थ्येनान्यत् (क, ख.)

[1] **न, नियोगविषयासंबन्धात्, ततः [2] क्रियान्तरभाव्यस्यापि विशेषणत्वात्। [3] इच्छामात्रप्रवृत्तिदर्शनाच्चायुक्तमेवैतत्।**

नन्वेवं [4] नैमित्तिकत्वे चाग्निहोत्रादीनां नित्यत्वव्याघातः। [5] अयमप्यपरो

एतन्निराकरोति — **न, नियोगविषयासंबन्धादिति।**

अयमाशयः — यदेतन्नियोज्यविशेषणस्य स्वर्गादेः भाव्यत्वमिच्छाविषयतया अवगतम् न तत् [6] नियोगविषययागादिसम्बन्धकारितम् अन्यसाध्यस्यापि साध्य-(विशेषण) त्वोपपत्तेः इति।

अभ्युपेत्य भाव्यत्वसिद्धिं स्वर्गादेरुक्तम्। इदानीं भाव्यत्वमेव स्वर्गादे (र्नास्ति) इच्छाविषयतामात्रे दुरु (प्रवृत्त्यु) पगमादित्याह — **इच्छामात्रप्रवृत्तिदर्शनाच्चायुक्तमेवैतदिति।** एतत्स्वर्गादेर्भाव्यत्वमयुक्तम् इच्छा [मात्रस्य] विषयसाध्यता(ज्ञान) शून्यस्यापि प्रवृत्तिदर्शनादिति।

तत्र परः परिचोदयति — **नन्वेवं नैमित्तिकत्वे चाग्निहोहोत्रादीनां नित्यत्वव्याघात इति।**

अयमर्थः — यदि स्वर्गकामोऽग्निहोत्रं जुहुयात् इत्यत्र स्वर्गस्य भाव्यत्वं परिगृह्यते ततः काम्यमिदं अग्निहोत्रं स्यात्, 'यावज्जीवमग्निहोत्रं जुहुयात्' इति च

---

1. नियोगविषयसंबन्धः कुतः (ग.)
2. साध्यस्यापि (ग.)
3. मात्रे (ग.)
4. नैमित्तिकत्वादग्नि (क, ख, ग.)
5. मपरोऽस्य दोषो (क, ख.)
6. न नियोगविषयतया यागादि (क, ख, ग, घ, ङ, च.)

दोषोऽस्तु, न तु नियोज्यविशेषपरात्फलप्रतिपत्तिः । [1]ननु स्वर्गकामस्य यागः [2]कर्तव्योऽवगम्यते । कथं च स तस्य कर्तव्यः यदि [3]तं न निष्पादयति ?

नित्यम्, इति नित्यकाम्यविभागः सिद्ध्यति । यदा तु स्वर्गस्य भाव्यत्वं नेष्यते तदा स्वर्गकामनाया अपि जी(वन)वन्निमित्तत्वेनान्वयात् स्वर्गकामनायां सत्यां अग्निहोत्रं जुहुयादिति नैमित्तिकत्वमेव भवेत् न काम्यत्वम् । भवतु को दोष इति चेत् — उच्यते — यावज्जीवमिति श्रुत्या अस्या उपसंहारो वाच्यः । अनुपसंहारे तथैव स्वर्गकामश्रुतिविषयस्यापि व्याप्य(प्त)त्वात्स्वर्गकामश्रुतेरानर्थक्यं स्यात् । अतः तत्परिहाराय स्वर्गकामो जीवन्नग्निहोत्रं जुहुयादित्यर्थः स्यात् । तथा सति नित्यत्वं व्याहन्येत । सत्यपि जीवने स्वर्गकामनायामसत्यामनुष्ठानं (न) स्यात् इति ।

सिद्धान्तवाद्याह — **अयमप्यपरोदोषोऽस्तु न तु नियोज्यविशेषपरात्फलप्रतिपत्तिरिति** । अस्य पक्षस्यायमप्यपरोदोषोऽस्तु—अग्निहोत्रस्य नित्यत्वव्याघातरूपः पूर्वोक्तश्च स्वर्गादीनां भाव्यत्वासिद्धिरूपः । न पुनरेतद्दोषपरिहारायैव नियोज्यविषयपरात् फलप्रतिपत्तिः सम्भवति । न प्रयोजनवशवर्ति शब्दसामर्थ्यमित्यभिप्रायः ।

पुनश्चोदयति — **ननु स्वर्गकामस्य यागः कर्तव्योऽवगम्यते कथं च स तस्य कर्तव्यः यदि तं न निष्पादयतीति** । तस्य स्वर्गकामस्य कथं स यागः कर्तव्यो भवति, यदि यागतः (गःतस्य) स्वर्गं न सम्पादयति । यो हि यस्य किञ्चित्संपादयति स एव तस्य कर्तव्यो भवति, नान्य इत्यभिप्रायः ।

---

1. ननु च (ग.)
2. कर्तव्यो वा कथं (ख.)
3. न तं संपादयति (ख, ग.)

न, गृहदाहवत इवेच्छावतः किञ्चिदसम्पादयतोऽपि कर्तव्यता स्यात् । [1] **यदि तर्ह्यसम्पादयति स्वर्गं यागे पुरुषः प्रवर्तते न तर्हि स्वर्गकामः । न,** [2] **निमेषादिष्वतथाभूतेष्वपि प्रवर्तमानस्य स्वर्गकामत्वाविघातात् । हेत्वन्तरात्तत्र प्रवृत्तिरिति चेत् — इहापि नियोगादिति न दोषः ।**

एतद्दूषयति—**न, गृहदाहवत इवेच्छावतः किञ्चिदसम्पादयतोऽपि कर्तव्यत्वा-(व्यता स्या) दिति** । गृह्यदाहवतः पुरुषस्य क्षामवतीये कर्मणि कर्तव्यत्वं किञ्चित्फल-मसंपादयत्यपि दृश्यते । तथेहापि स्यादित्यभिप्रायः ।

कामाधिकारे विशेषं मन्वानश्चोदयति — **यदि तर्हि असंपादयतः (ति) स्वर्गं यागे प्रवर्तते न तर्हि स्वर्गकाम इति** । यदि स्वर्गानुपाये यागे प्रवर्तते न तर्हि स्वर्गकामः । स्वर्गानुपाये प्रवृत्तिः स्वर्गकामत्वं च विरुध्यत इत्यभिप्रायः ।

उत्तरमाह—**न, निमेषादिष्वतथाभूतेष्वपि प्रवर्तमानस्य स्वर्गकामत्वाविघघाता-दिति** । स्वर्गानुपायभूतेष्वपि निमेषादिषु प्रवर्तमानस्य स्वर्गकामत्वाविघातदर्शनादनै-कान्तिकमेतदित्यभिप्रायः ।

तत्र विशेषं शङ्कते — **हेत्वन्तरात्तत्र प्रवृत्तिरिति चेत् इति** । निमेषादौ प्रवृत्तिः हेत्वन्तरात्, न स्वर्गकामनया । अतः स्वर्गकामत्वस्य न व्याघातः इति ।

परिहरति — **इहापि नियोगात् इति न दोष इति** । इह यागादावपि न फलकामनातः प्रवृत्तिः काम्यमानसाधनभावस्याज्ञातत्वात्, कुतस्तर्हि? नियोगादेवे-त्यविशेषः ।

---

1. यदि ह्यसंपादयति प्रवर्तते न तर्हि (क, ख.)
2. निमित्तादिष्विवातथाभूतेष्वेव (क, ख.)

स्यादेतत्—स्वर्गसिद्धाविच्छापगमे नियोगनिष्पत्तिः। अन्यथा कृतयागोऽपि नियोज्य एव स्यात्, [1] न कृतनियोगः। अतो नियोगार्थनिष्पत्तिसामर्थ्यात्स्वर्गादिसिद्धि[निष्पत्तिः] [2] । न, विषयसिद्ध्या नियोगनिष्पत्तेः, स्वर्गादेश्च [3] नियोज्यविशेषणत्वेनाविषयत्वात् । अन्यथा [4] गृहदाहादेरप्यपगमप्रसङ्गः ।

पुनर्नियोगवादिनो मतं शङ्कते — **स्यादेतत् स्वर्गसिद्धाविच्छापगमे नियोगनिष्पत्तिः। अन्यथा कृतयागोऽपि नियोज्य एव स्यात्, न कृतनियोगः। अतो नियोगार्थनिष्पत्तिसामर्थ्यात्स्वर्गादिसिद्धिरिति ।**

अयमभिप्रायः — नियोगस्य कर्तव्यता अवगम्यते यजेतेति राजनियोगः कर्तव्यो गुरुनियोगः कर्तव्य इति। तस्य च नियोग(स्य) निष्पत्तिः स्वर्गनिष्पत्त्या भवति, अधिकारनिष्पत्तिपर्यन्तत्वात्तस्याः। अधिकारनिष्पत्तिश्च स्वर्गनिष्पत्त्या कामापगमे भवति नान्यथा। इतरथा [5] कृतयागोऽपि अकृतशास्त्रार्थः स्यात्। अधिकारनिमित्तस्य स्वर्गकामत्वस्य पूर्ववदवस्थानादिति तन्नियोगस्याकृतत्वात् । अतो नियोगार्थनिष्पत्तिसामर्थ्यात्स्वर्गादिनिष्पत्तिरिति ।

निराकरोति — **न, विषयसिद्ध्या नियोगार्थनिष्पत्तेः स्वर्गादेश्च नियोज्यविशेषण[पर]त्वेनाविषयत्वात्, अन्यथा गृहदाहादेरप्यपगमप्रसङ्ग इति ।** विषयनिष्पत्त्यैव नियोगो निष्पद्यते। न च नियोज्यविशेषणस्य स्वर्गस्य विषयभावः, यागस्यैव [6] तद्भावात् । न चाधिकारनिमित्तापगमापेक्षा नियोगनिष्पत्तिः । यदि तदपेक्षा गृहदाहस्यापगमोऽपेक्षितव्यः स्यात् का (क्षा) मवतीयनियोगनिष्पत्तेरिति ।

---

1. न तु (ख.)
2. सिद्धिप्रतीतिः (क, ख, ग.)
3. विशेषणपरत्वेन (क, ख.)
4. दाहादेरपि प्रसङ्गः (क, ख.); दाहादेरप्यनुपरमप्रसङ्गः (ग.)
5. कृतयागोऽपि विकृतशास्त्रार्थः (छ.)
6. तत्स्वभावात् (छ.)

तस्मात्फलपराः [1] स्वर्गकामादिश्रुतय इति मनोहरम् ।

इत्यार्यमण्डनस्य कृतिर्भावनाविवेकोऽवसितः ॥

प्रतिपादितमर्थं निगमयति — **तस्मात्फलपराः स्वर्गकामादिश्रुतयः इति मनोहरमिति** । एवमुक्तेन न्यायेन स्वर्गादीनां फलभावस्यानन्यलभ्यत्वात् सामर्थ्यलभ्यत्वाच्च नियोज्यविशेष[ण]स्य स्वर्गकामादिश्रुतयः फलपरा इत्येष एव पक्षः शोभन इति ।

श्रीमन्मण्डनमार्ताण्डसन्न्यायोक्तिगभस्तिभिः ।
उन्मीलितावगाढेयं भावनानलिनी मया ॥
भावनाया विवेकस्य विवृत्तिं **विष्णुनन्दनः** ।
लघ्वीं **नारायणश्चक्रे** नारायणपरायणः ॥

इति भावनाविवेकविवृतिः नारायणकृता समाप्ता ॥

---

1. कामश्रुतयः (क, ख.)

NYAYAPARISUDDHI

EDITED WITH TRANSLATION AND NOTES

BY

R. RAMANUJACHARI, M. A.,
Professor of Philosophy, Annamalai University

AND

Pandit K. SRINIVASACHARYA, SIROMANI,
Lectuver in Sanskrit Annamalai University.

अतश्चोक्तेन समानयोगक्षेमयुक्तिप्रमाणकः कर्मेन्द्रियवर्ग उपलक्षणीयः, 'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः'[1] इति सूत्रे वाचः कण्ठोक्तेः पाण्यादिचतुष्टयस्य शरीरव्यापारकरणतया सूचनादिति ।

शारीरके तु 'सप्तगतेर्विशेषितत्वाच्च'[2] इति पूर्वपक्षमुपक्षिप्यासाधयच्च

अपरीक्षितस्य — साक्षादसूत्रितस्य, विशेषपरीक्षणं — विशेषधर्मकथनम् । अभ्युपगमादिति ज्ञापकत्वे पञ्चमी ; अभ्युपगमज्ञापकमित्यर्थः । विशेषपरीक्षणात् ज्ञायते सूत्रकृतोऽभ्युपगतमिदमिति । तथा च साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः ; यथा मनस इन्द्रियत्वमिति ।

अत इति — ज्ञानेन्द्रियपञ्चकोपादानस्य इन्द्रियान्तरप्रतिक्षेपार्थत्वासम्भवादित्यर्थः । **उक्तेनेति** — मनसेत्यर्थः । **समानयोगक्षेमयुक्तिप्रमाणक इति** — समानयोगक्षेमे युक्तिप्रमाणे यस्येति बहुव्रीहिः ।

अयं भावः — यथा सुखादिसाक्षात्कारः इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदिति युक्तिशब्दितानुमानेन 'मनषष्ठानि इन्द्रियाणि' इति प्रमाणशब्दितागमेन च मनइन्द्रियस्य, सिद्धिः तथा आदानादिकं इन्द्रियकरणकं क्रियात्वात् ज्ञानवदिति युक्त्या, 'इन्द्रियाणि दशैकञ्च' इत्याद्यागमेन च हस्तादिकर्मेन्द्रियाणामपि सिद्धिरिति ।

ननु कर्मेन्द्रियवर्गस्य सूत्रान्तरेऽप्यनुपादानात् न तदुपलक्षणसम्भव इत्यत आह — **प्रवृत्तिरिति** । वाग्बुद्धिशरीराणां आरम्भो व्यापारः प्रवृत्तिरित्यर्थः । अत्र बुद्धिशब्देन मनो विवक्षितम् । प्राञ्चस्तु अदृष्टसाधनत्वेन व्यापारविशेषणात् तादृशा एव वाचिकमानसिककायिकव्यापाराः कारणरूपाः प्रवृत्तयः कार्यरूपा तु धर्माधर्मात्मिकैवेति वदन्ति ।

कर्मेन्द्रियवर्गस्य प्रामाणिकत्वे खलु इत्थं वक्तुं शक्यमित्यतस्तस्य प्रामाणिकत्वमाह — **शारीरके त्विति** ।

1. न्या॰ द॰ 1-1-17
2. बा॰ सू॰ 2-4-4

हस्तादीनामपीन्द्रियत्वं भगवान् बादरायणः 'हस्तादयस्तु स्थितेऽतो नैवम्'[1] **इति । 'भूतेभ्यः' इति च नोपादानाभिप्रायम्; अहङ्कारोपात्तानामाप्यायक भूतविवक्षयापि तदुपपत्तेः । तथा च वेदार्थसङ्ग्रहे — "एवमाहङ्कारिकाणा-**

ननु तथापि भूतेभ्य इति भूतोपादानकत्वाभिधानात् सात्विकाहङ्कारोपादानकत्व-प्रतिपादकागमविरोधो दुष्परिहर एवेत्यत आह — **भूतेभ्य इतीति** । **अहङ्कारोपात्तानामिति** — सात्विकाहङ्कारोपादानकानामित्यर्थः । 'देवा वैकारिका मताः' इति स्मरणादिति भावः । **आप्यायकभूतविवक्षयेति** — श्रोत्रस्य आकाशात्मकत्वाङ्गीकारेण आकाशोपादानकत्वविरहेण नैयायिकमतेऽपि भूतेभ्य इत्यस्य भूतोपादानकत्व-प्रतिपादकत्वासम्भवादिति भावः ।

समाधानमिति — भृगुभरद्वाजसंवादे —

भूमेर्गन्धगुणं वेत्ति रसञ्चाद्भ्यः शरीरवान् ।
ज्योतिः पश्यति रूपाणि स्पर्शं वेत्ति च वायुतः ।
शब्दं श्रृणोति च सदा आकाशात्तु शरीरवान् ॥

अन्यत्र मोक्षधर्मे —

शब्दः श्रोत्रं तथा खादित्रयमाकाशसम्भवम् ।
वायोः स्पर्शस्तथा चेष्टा त्वक्चैव त्रितयं स्मृतम् ।
रूपं चक्षुस्तथा व्यक्तिस्त्रितयं ज्योतिरुच्यते ।
रसः क्लेदश्च जिह्वा च त्रयो जलगुणाः स्मृताः ।
घ्राणं घ्रेयं शरीरं च ते तु भूमिगुणाः स्मृताः ॥

इति इन्द्रियाणां भूतजन्यत्ववचनं भूताप्यायनपरमिति समाधानमित्यर्थः ।

---

1. बा. सू. 2-4-5

मिन्द्रियाणां भूतैश्चाप्यायनं महाभारत उच्यते" इति। समाधानमृष्यन्तरवाक्यस्यापि समानन्यायस्य निर्वाहार्थम्। परस्परविरुद्धप्रमाणवाक्येषु तात्पर्यविशेषपरिकल्पनया परिहार एव हि पण्डितकृत्यम्। अनित्यमनोवादिभिरपि हि 'अन्नमयं हि सोम्य मनः' इति श्रुतिराप्यायनपरतयैव योज्या। तुल्यमिदमन्यत्रापीति।

यत्तु — 'बाधनालक्षणं दुःखम्' 'तदत्यन्तविमोक्षोऽपवर्गः'[1] इति; तत्र दुःखात्यन्तनिवृत्तेरपवर्गत्वं सर्वाङ्गीकृतम्। न च तत्रानन्दः श्रौतः कण्ठोक्त्या प्रतिषिद्ध्यते। तदभिप्राये चानन्यथासिद्धं किमपि न लिङ्गं पश्यामः। अत एव हि भूषणमते नित्यसुखसंवेदनसम्बन्धासिद्धिरपवर्गे साधिता। एतेन 'तस्मात्सर्वदुःखविमोक्षोऽपवर्गः' इति चतुर्थाध्यायवाक्यमपि निर्व्यूढम्; तत्राप्यानन्दनिषेधाभावात्।

यच्च शारीरकद्वितीयाध्यायविरुद्धमिह द्वितीयाध्यायेऽवयविसमर्थनमिवाभाति, तदपि तदेकार्थं योजयितुं शक्यम्। तथाहि—'न चैकदेशोपलब्धिरवयवि-

ऋष्यन्तरवाक्यस्यापीति — उक्तगौतमवाक्यस्यापीत्यर्थः। **अनित्यमनोवादिभिः** — सात्विकाहङ्कारोपादानकमनोवादिभिः वेदान्तिभिः। **आप्यायनपरतयैवेति** — न तु उत्पत्तिपरतयेत्येवकारार्थः।

दुःखात्यन्तनिवृत्तेरिति — दुःखप्रागभावासमानकालीनदुःखनिवृत्तेरित्यर्थः। **अपवर्गत्वं** — अपवर्गशब्दवाच्यत्वं, अपवर्गव्याप्यत्वं वा। **अनन्यथासिद्धमिति** — आनन्दानुक्तिमात्रस्य आनन्दे अपवर्गशब्दवाच्यत्वं नास्तीत्येतावन्मात्राभिप्रायकतयाप्युपपत्तेरिति भावः।

शारीरकद्वितीयाध्यायविरुद्धमिति — तत्र 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यादिना कार्यस्योपादानानन्यत्वस्थापनादिति भावः।

अवयविसमर्थनमिति — उपादानातिरिक्तकार्यसमर्थनमित्यर्थः। **तदेकार्थमिति** — शारीरकैकार्थमित्यर्थः। **न च एकदेशोपलब्धिरवयविसद्भावादिति** — यदपि

---

1. न्या. द. 1-1-21 & 22

सद्भवात् । साध्यत्वादवयविनि सन्देहः । सर्वाग्रहणमवयव्यसिद्धेः । धारणाकर्षणोपपत्तेश्च । सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम्''[1] ।

वृक्षादिज्ञानस्य एकदेशग्रहणात्मकलिङ्गज्ञानजन्यानुमितिरूपत्वमिति तदपि नेत्यनेन सूत्रेणाभिधीयते । **न च एकदेशोपलब्धिरिति** — एकदेशस्यैव प्रत्यक्षमित्यपि नेत्यर्थः । **अवयविसद्भावादिति** — एकदेशातिरिक्तावयविनस्सत्त्वात् एकदेशेन्द्रियसन्निकर्षकाले अवयविन्यपि इन्द्रियसन्निकर्षसत्त्वेन तत्प्रत्यक्षस्यापि सम्भवादिति भावः । **साध्यत्वादवयविनि सन्देह इति** — अनेन अवयविसद्भावादित्युक्तोऽवयव्याक्षिप्यते । अवयविनि साध्यत्वात् — असिद्धत्वात्; सन्देहः, अवयविसद्भावादित्युक्तहेतोः । तथा च सन्दिग्धासिद्धो हेतुरित्यर्थः ।

सर्वाग्रहणमवयव्यसिद्धेरिति — इदं सिद्धान्तसूत्रम् । अत्र वात्स्यायनभाष्यम् — यद्यवयवी नास्ति सवस्य ग्रहणं नोपपद्यते । किं तत्सर्वम्? द्रव्यगुणकर्मसामान्यविशेषसमवायाः । कथं कृत्वा? परमाणुसमवस्थानं तावद्दर्शनविषयो न भवतीत्यतीन्द्रियत्वादणूनाम् । द्रव्यान्तरञ्च अवयविभूतं दर्शनविषयो नास्ति । दर्शनविषयस्थाश्चेमे द्रव्यादयो गृह्यन्ते । तेन निरधिष्ठाना न गृह्येरन् । गृह्यन्ते तु कुम्भोऽयं श्याम एको महान् संयुक्तः स्पन्दते अस्ति मृण्मयश्चेति । सन्ति चेमे गुणादयो धर्मा इति । तेन सर्वस्य ग्रहणात् पश्यामः अस्ति द्रव्यान्तरभूतोऽवयवीति ।

धारणाकर्षणोपपत्तेश्चेति — इदञ्चावयविसाधकं हेत्वन्तरम् । अवयवातिरिक्तावयविसत्त्व एव धारणाकर्षणे उपपद्येते । अन्यथा परमाणुपुञ्जत्वे एकदेशधारणेन सकलधारणं च न स्यादित्यर्थः । **सेनावनवत् ग्रहणमित चेन्न, अतीन्द्रियत्वादणूनामिति ।**

---

1. न्या. द. 2-1-33 to 37.

इत्येतानि हि तत्सूत्राणि । न तानि विरुद्ध्यन्ते; सेनावनादिव्यावृत्तावयव्यारम्भकतया तदसमवायिकारणत्वाभिमतावस्थाविशेषापन्नस्सङ्घातविशेष एवावयविशब्देन निर्दिश्यत इत्यविरोधात् । तावतैवोपलम्भव्यवहारविशेषादेश्चरितार्थत्वात् । अतीन्द्रियाणुवचनमपि प्रदीपावयवानामिव ऐन्द्रियकाणामेवावस्थाविशेषेणातीन्द्रियत्वाभ्युपगमादविरुद्धम् । अव्यक्तमेव हि त्रिगुणद्रव्यमवस्थाविशेषाद्व्यक्तं भवतीत्यागमिकाः । प्रत्येकमुपलम्भायोग्यानामपि संहतिविशेषरूपावस्थाभेदादैन्द्रियकत्वतत्तारतम्यादिकं हिमानीचूर्णपुञ्जादिष्वनारब्धावयविषु

अयमर्थः — अतिदूरस्थैकमनुष्यैकवृक्षादेरप्रत्यक्षत्वेऽपि सेनावनादिप्रत्यक्षवत् एकपरमाणोरप्रत्यक्षत्वेऽपि तत्समूहरूपघटादेः प्रत्यक्षं स्यादिति चेन्न; अणूनामतीन्द्रियत्वात् । प्रत्यक्षे महत्त्वस्य हेतुत्वात् तत्सत्त्वात् सेनावनादिप्रत्यक्षं युज्यते; न त्वणूनामिति ।

उपलम्भेति । अवयवानां बहुत्वेऽप्येकत्वोपलम्भः उपलम्भविशेषः, व्यवहारविशेषः धारणाकर्षणरूपः, आदिना जलाहरणादिकार्यविशेषो गृह्यते ।

ऐन्द्रियकानामेवेति — जालसूर्यमरीच्यादियोगे प्रत्यक्षयोग्यानामेवेत्यर्थः ।

अवस्थाविशेषेणेति । अनुद्भूतरूपवद्वस्तुविशेषत्वजालसूर्यमरीचिसंयोगरहितत्वावस्थाविशेषेणेत्यर्थः ।

अवस्थाविशेषादिति । वायुत्वतेजस्त्वावस्थाविशेषेत्यर्थः ।

व्यक्तमिति । स्पार्शनचाक्षुषप्रत्यक्षविषयीभूतमित्यर्थः । तत्तारतम्यादिकमित्यादिना शैत्यचक्षुःक्षोभादिकार्यविशेषो गृह्यते ।

लोकसिद्धम् । उपमानाख्यप्रमाणान्तरसमर्थनं तु न्यायैकदेशिभिरेवोपमानस्यानुमानान्तर्भावप्रतिक्षेपमात्रपरतया निर्व्यूढम् ।

उपमानाख्यप्रमाणान्तरसमर्थनमिति—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति पृथक्पृथक्प्रमाणतया उद्देशात् 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्' इति तथैव लक्षणाभिधानात् 'अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः' इत्यादिभिः पञ्चभिः सूत्रैः तत्परीक्षणाच्चेति भावः ।

अनुमानान्तर्भावप्रतिक्षेपमात्रपरतयेति । 'प्रत्यक्षेणाप्रत्यक्षसिद्धेः' 'नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति' 'तथेत्युपसंहारादुपमानसिद्धेः नाविशेषः'[1] इति त्रिभिः सूत्रैस्तावन्मात्रस्यैव करणादिति भावः । तत्र हि 'अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः' इति सूत्रेण[2] 'प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्'[3] इति लक्षणे साधर्म्यं आत्यन्तिकं प्रायिकं ऐकदेशिकं वा? नाद्यः; गौरिव गौरित्युपमानविरहात् । न द्वितीयः; गौरिव महिष इत्युपमानविरहात् । न तृतीयः; मेरुरिव सर्षप इति तदभावात् । अतो लक्षणं दुःस्थमिति पूर्वपक्षमुपक्षिप्य 'प्रसिद्धसाधर्म्यादुपमानसिद्धेः यथोक्तदोषानुपपत्तेः'[4] इति सूत्रेण समाधानं कृतम् ।

अयमर्थः — प्रसिद्धं प्रकर्षेण महिषादिव्यावृत्त्या सिद्धं ज्ञातं यत्साधर्म्यं तज्ज्ञानस्योपमितिकरणत्वान्न दोषः । साधर्म्यञ्च प्रकरणाद्यनुरोधात् कचित्किञ्चिदिति । तदनन्तरं च 'प्रत्यक्षेणाप्रत्यक्षसिद्धेः' इति सूत्रेण प्रत्यक्षेण—गोसादृश्यविशेषेण अप्रत्यक्षस्य-गवयपदवाच्यत्वस्यानुमितेरुपमानमनुमानान्तर्भूतमेव न मानान्तरमित्यर्थकेन उपमानस्यानुमानान्तर्भावमाशङ्क्य 'नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति' तन्निरसनं

---

1. न्या. द. 2-1-47 to 49.
2. न्या. द. 2-1-45.
3. न्या. द. 2-1-6.
4. न्या. द. 2-1-46 अनुपपत्तिः, पां

यच्च — [1]'पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः' इति शब्दार्थ सम्बन्धाभावमुपक्षिप्य परिहरता [2]'शब्दार्थव्यवस्थानादप्रतिषेधः' [3]'न सामयि-

कृतम् । अयमत्र सूत्रार्थः — गवये प्रत्यक्षे गवयपदवाच्यत्वव्याप्यवत्तया अनिश्चिते उपमानस्य प्रामाणार्थमुपमानजन्यप्रमितिरूपं प्रयोजनं न पश्याम इति । तथा च व्याप्त्यादि-ज्ञानविरहेऽपि गवये गोसादृश्यज्ञानमात्रात् जायमानायाः 'गवयो गवयपदवाच्यः' इति प्रतीतेरनुमानफलत्वासम्भवान्नोपमानस्यानुमानान्तर्भावसम्भव इति भावः । ननु व्याप्त्यादिज्ञाननियमः कल्प्यतामित्याशङ्कानिरासायोक्तम् — 'तथेत्युपसंहारादुपमानसिद्धेः नाविशेषः' इति । अयमर्थः—अनुमानादुपमानस्य नाविशेषः; तथेत्युपसंहारात्—यथा गौस्तथा गवय इति तज्ज्ञानमात्रात् उपमानसिद्धेः—उपमानाधीनप्रमितिरूपगवयपदवाच्यत्वज्ञानो-त्पत्तेरिति । तथा च व्याप्त्यादिज्ञानविरहेऽपि गवयपदवाच्यत्वादिप्रमित्युत्पत्तेरानु-भाविकतया न तत्र व्याप्त्यादिज्ञाननियमकल्पनसम्भव इति भावः । तथा च एभिस्सूत्रैरुपमानस्यानुमानान्तर्भावप्रतिक्षेपमात्रस्यैव करणान्न तस्य प्रमाणान्तरत्वं सूत्रकार-सम्मतमिति न्यायैकदेशिभिर्निर्व्यूढमिति । अधिकमुत्तरत्र वक्ष्यते ।

पूरणेत्यादि सम्बन्धाभाव इति — यत्र शब्दस्तत्र अर्थ इत्येवं व्याप्त्यभाव इत्यर्थः । तत्र हेतुः पूरणप्रदाहपाटनानुलब्धेरिति । यदि शब्दः अर्थव्याप्यः स्यात्, तदा अन्नशब्दोच्चारणे मुखस्यान्नेन पूरणं स्यात्; व्याप्यस्य शब्दस्य सत्वेनार्थसद्भावा-वश्यम्भावात् । एवमग्निशब्दोच्चारणे मुखदाहः स्यात् । तथा वास्यादिशब्दोच्चारणे मुखपाटनं स्यात् । अतस्तदनुपलब्धेः न शब्दस्यार्थव्याप्यत्वमिति ।

शब्दार्थव्यवस्थानादप्रतिषेध इति — अप्रतिषेधः शब्दार्थयोः न सम्बन्ध-सामान्यभावः । तत्र हेतुः **शब्दार्थव्यवस्थानादिति** — कश्चिदेव शब्दः

---

1. न्या. द. 2-1-54.
2. न्या. द. 2-1-55.
3. न्या. द. 2-1-56.

कत्वाच्छब्दादर्थे प्रत्ययस्य'[1] इत्यादिना सामयिकत्वमुक्तं, तदपि सम्प्रतिपन्नसामयिकत्वद्वारानुमानादिविलक्षणसम्बन्धविशेषख्यापनार्थमिति योज्यम्; अनादि-

कश्चिदेवार्थं बोधयति न सर्वस्सर्वमिति व्यवस्थासत्त्वादित्यर्थः। शब्दार्थयोस्सम्बन्धाभावेऽसम्बद्धमेवार्थं शब्दः प्रत्याययतीति वक्तव्यम्। तथा सति सर्वोऽपि शब्दः सर्वमप्यर्थं प्रत्याययेत् अविशेषात्। अतश्शब्दार्थयोस्सम्बन्धस्वीकार अवश्यकः। परन्तु स सम्बन्धो न मुखपूरणादिनियामक इत्येवाश्रयणीयम्।

इत्थञ्च सम्बन्धे सिद्धे तेन सम्बन्धेन व्याप्तेरप्यावश्यकतया शब्दादर्थप्रतीतिरनुमितिरूपैवेति न शब्दस्य प्रमाणान्तरत्वसम्भव इति पूर्वपक्षे समाधानमाह — **न सामयिकत्वात् शब्दादर्थे प्रत्ययस्येति** शब्दाधीनार्थप्रत्ययस्य सङ्केताधीनत्वादित्यर्थः। शब्दार्थयोः सङ्केतरूपसम्बन्धाभ्युपगमादस्मन्मतेऽपि व्यवस्थोपपत्तिः। परन्तु तस्य सम्बन्धस्य वृत्त्यनियामकतया तेन संबन्धेन व्याप्त्यसम्भवात् व्याप्तिज्ञानविधुराणामपि तादृसम्बन्धज्ञानमात्रात् शाब्दबोधोदयाच्च शब्दादर्थप्रतीतिर्नानुमितिरूपेति शब्दस्य प्रमाणान्तरत्वं सुस्थमेवेति भावः।

प्रत्ययस्येत्यादीत्यादिना — 'जातिविशेषे चानियमात्'[2] इति सूत्रपरिग्रहः। इदञ्च सूत्रमित्थं व्याख्यातं वात्स्यायनभाष्ये — सामयिकः शब्दादर्थसम्प्रत्ययो न स्वभाविकः; ऋष्यार्यम्लेच्छानां यथाकामं शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्तते। स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्यात्; यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे व्यभिचरतीति। **सम्प्रतिपन्नसामयिकत्वद्वारेति** — साङ्केतिकत्वेन सम्प्रतिपन्नडित्थादि शब्दजन्यबोधप्रदर्शनमुखेनेत्यर्थः। **अनुमानादिविलक्षणसंबन्धविशेषख्यापनार्थमिति**—अनुमितिप्रयोजकव्याप्तिप्रत्यक्षप्रयोजकेन्द्रियार्थसन्निकर्षविलक्षणस्य औत्पत्तिकस्तु शब्दस्यार्थेन • सम्बन्ध'[3] इति,

1. शब्दार्थसंप्रत्ययस्य पा.
2. न्या. द. 2–1–57
3. जै. सू. 1–1–5

निधनाविच्छिन्नसम्प्रदायवेदवर्तिनां पदानां मन्वादिवचनविरुद्धसाङ्केतिकत्वो-पपादनक्लृप्त्यसम्भवात् ।

सूत्रोक्तस्य संबन्धविशेषस्य प्रदर्शनार्थमित्यर्थः । अयं भावः — व्याप्तिज्ञानाद्यभावेऽपि डित्थादिसाङ्केतिकशब्दादर्थप्रतीतिदर्शनेन व्यभिचारात् शब्दादर्थप्रतीतेर्व्याप्त्यधीनत्वा-सम्भवात् तद्विलक्षण एव सम्बन्धो वाच्य इत्येवं वक्तुं साङ्केतिकशब्दाधीनबोधप्रदर्शनं 'न सामयिकत्वात्' इति सूत्रेण[1] कृतम् । न तु सर्वेषां शब्दानां सामयिकत्वमुक्तमिति ।

मन्वादिवचनविरुद्धेति —

अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः ॥

इति मनुवचनेन, 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' इति जैमिनिवचनेन[2] **'सिद्धे** शब्दार्थसम्बन्ध' इति पतञ्जलिवचनेन च विरुद्धेत्यर्थः ।

साङ्केतिकत्वोपपादनक्लृप्त्यसम्भवादिति — गौतमस्य सर्वेषां शब्दानां साङ्केतिकत्वप्रतिपादनतात्पर्यकत्वकल्पनासम्भवादित्यर्थः । उक्तरीत्या ऋष्यन्तरवचना-विरुद्धार्थसम्भवादिति भावः ।

न च ईश्वरसङ्केतस्यैव शब्दार्थसंबन्धरूपत्वाभ्युपगमात्तस्य च नित्यत्वान्न नित्यत्वप्रतिपादकऋष्यन्तरवचनविरोध इति वाच्यम्; निरीश्वरवादिनामपि शब्दादर्थ-प्रतीतिदर्शनेन शब्दार्थसम्बन्धस्य ईश्वरसङ्केतरूपत्वासम्भवात्, घटादिशब्दानामसाङ्केति-

1. न्या. द. 2-1-56
3. जै. सू. 1-1-5

यच्च 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्'[1] इति, एतदप्यनादिनिधनस्यैव वेदस्य प्रतिकल्पमीश्वरेणाप्ततमेन यथापूर्वं प्रवर्तनमभिसन्धायेति सुगमम् ।

वर्णानित्यत्ववर्णनं तु न श्रुत्यादिविरुद्धम्, प्रत्युतानुकूलमेव । शारीरकदेवताधिकरणे वर्णानित्यत्वमभ्युपगम्यैव हि 'अत एव च नित्यत्वम्'[2] 'समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च[3]' इति वेदनित्यत्वं साधितम् ।

कत्वनिर्णयवतामपि घटादिशब्देभ्यः शाब्दबोधस्यानुभाविकतया तेषां साङ्केतिकत्वस्यैवासम्भवाच्च । **मन्त्रेत्यादि** । **आप्तस्य** — वेदकर्तुः । **प्रामाण्यात्** — यथार्थदर्शित्वयथादृष्टार्थवादित्वरूपात् । **तत्प्रामाण्यं** — वेदप्रामाण्यम् । तत्र दृष्टान्तमाह — **मन्त्रायुर्वेदप्रामाण्यवदिति** । मन्त्रो — विषादिनाशकः ; आयुर्वेदभागश्च वेदस्य एव । तत्प्रामाण्यञ्च संवादेन निर्णीतमिति तद्दृष्टान्तीकरणम् । **यथापूर्वं प्रवर्तनमभिसन्धायेति** — तथा च आप्तप्रामाण्यादित्यस्यायमेवार्थ इति भावः ।

वर्णानित्यत्वसमर्थनमिति — 'आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च' इत्यादिसूत्रैरिति[4] भावः । **न श्रुत्यादिविरुद्धमिति** — श्रुत्यादिषु क्वापि वर्णनित्यत्वाप्रतिपादनादिति भावः । **प्रत्युतानुकूलमेवेति** — आकाशाद्युत्पत्तिवादिश्रुत्यादीनां तदपृथक्सिद्धशब्दाद्युत्पत्तावपि तात्पर्यावश्यम्भावादिति भावः । ननु वर्णानामनित्यत्वे कथं तत्सङ्घातात्मकवेदनित्यत्वमित्यत आह — **शारीरकेति** ।

वर्णानित्यत्वमभ्युपगम्यैवेति — वर्णानित्यत्वेऽपि वेदनित्यत्वोपपत्तेरिति भावः । तथाहि सर्वेष्वपि कल्पेषु अग्निमीड इत्यानुपूर्व्यैक्यमेव वेदनित्यत्वम् । महाभारतादिषु

1. न्या॰ द॰ 2-1-69
2. बा॰ सू॰ 1-3-28
3. ,, 1-3-29
4. न्या॰ द॰ 2-2-13

प्रतिकल्पमानुपूर्वीभेदान्न तेषामीदृशं नित्यत्वम् । एवंविधनित्यत्वे च वर्णनित्यत्वानपेक्षणात् वर्णानित्यत्वेऽपि वेदनित्यत्वमुपपद्यत एवेति ।

अत एव च नित्यत्वमिति—यतो ब्रह्मा वैदिकाच्छब्दात् अर्थान् स्मृत्वा सृजति, अत एव च 'मन्त्रकृतो वृणीते' 'नम ऋषिभ्यो मन्त्रकृद्भ्यः' 'अयं सो अग्निरिति विश्वामित्रस्य सूक्तं भवति' इत्यादिभिः विश्वामित्रादीनां मन्त्रकृत्त्वे प्रतीयमानेऽपि मन्त्रादिमयवेदस्य नित्यत्वमुपपद्यते । एभिरेव मन्त्रकृतो वृणीत इत्यादिभिर्वेदशब्दैः अनधीतमन्त्रादिदर्शनशक्तान् विश्वामित्रादीन् स्मृत्वा तत्तदाकारान् तत्तच्छक्तियुक्तान् सृजति हि ब्रह्मा नैमित्तिकप्रलयानन्तरम् । ते च अनधीत्यैव इमान् मन्त्रादीन् स्वरतो वर्णतश्च अस्खलितान् पश्यन्ति । अतस्तेषां मन्त्रादिकृत्त्वं वेदनित्यत्वञ्चोपपद्यत इति ।

ननु प्राकृतप्रलये चतुर्मुखे वेदाख्यशब्दादौ च विनष्टे कथं वेदस्य नित्यत्वमित्यत आह — **समानरूपनामत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्चेति** । अत एव सृज्यानां समानरूपत्वात्प्राकृतप्रलयावृत्तावपि न विरोधः । आदिकर्ता हि परमपुरुषः पूर्वसंस्थानं जगत्स्मृत्वा तदाकारमेव जगत्सृजति । वेदांश्च पूर्वानुपूर्वीविशिष्टानाविष्कृत्य चतुर्मुखाय ददातीति श्रुतिस्मृतिभ्यामवगम्यते । श्रुतिस्तावत् 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति ।

स्मृतिश्च—

'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यते तानि तान्येव यथा भावा युगादिषु ॥' इति ।

यत्तु जैमिनीये शब्दाधिकरणे वर्णनित्यत्वसमर्थनं व्याचख्युः, स तु व्याख्यातॄणामेवापराधः असाङ्केतिकवाचकाकारनित्यत्वपरत्वेनान्यपरत्वात्तस्याधिकरणस्य ।

यच्च द्वितीयाध्यायान्ते 'व्यक्त्याकृतिजातयस्तु पदार्थः'[1] इत्युक्तम्, तत्रापि न वैशेषिकाभ्युपगतजातिस्वीकारे लिङ्गं पश्यामः । न ह्यत्र द्रव्यगुणादिपदार्थ-

ननु वर्णानामनित्यत्वाभ्युपगमे जैमिनीयशब्दाधिकरणविरोध इत्याशङ्कामनुभाषते -- **यत्त्विति** । **वर्णनित्यत्वसमर्थनं व्याचख्युरिति** — 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्[2] । इत्यादिसूत्रेष्विति भावः ।

असाङ्केतिकवाचकाकारनित्यत्वपरत्वेनेति — इत्थं हि शाबरभाष्ये शब्दाधिकरणारम्भेऽभिहितम् । उक्तं नित्यः शब्दार्थयोस्सम्बन्ध इति ; तदनुपपन्नम् ; शब्दस्यानित्यत्वात् । विनष्टः शब्दः पुनरस्य क्रियमाणस्यार्थेनाकृतकस्सम्बन्धो नोपपद्यते । न हि प्रथमश्रुताच्छब्दात् कश्चिदर्थं प्रत्येतीति । अनेन हि शब्दार्थसम्बन्धनित्यत्वसिद्ध्यर्थमेव शब्दनित्यत्वसाधनमिति लभ्यते । तच्च वाचकतावच्छेदकानुपूर्वीनित्यतयैवोपपद्यत इति तत्साधनपरमेव शब्दाधिकरणमिति भावः ।

वैशेषिकाभ्युपगतजातीति । [3]'द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च' 'सदिति यतो द्रव्यगुणकर्मसु सा सत्ता' इत्यादिकणादसूत्रोक्तनित्यानेकसमवेतरूपेति भावः ।

लिङ्गं न पश्याम इति — जातिशब्दमात्रस्य वक्ष्यमाणरीत्या स्वरूपनिरूपकधर्ममात्रपरतया अन्यथासिद्धत्वादिति भावः ।

---

1. न्या. द. 2–2–68
2. जै. सू. 1–1–18
3. वै. द. 1–2–5 ; 1–2–7

परिसङ्ख्यानं क्रियते ; 'ते विभक्त्यन्ताः पदम्'[1] इति प्रतिपादितपदवाच्यप्रदर्शन-परत्वात्। अनन्तरञ्च[2] तिसृणामेव लक्षणमाह[3] — 'व्यक्तिर्गुणविशेषाश्रयो मूर्तिः' 'आकृतिर्जातिलिङ्गाख्या' 'समानप्रसवात्मिका जातिः' इति। इह तु[4] वस्तुनो निरूपितस्वरूपविशेषकधर्मस्वरूपनिरूपकधर्मविषयतया यथासम्भवं योज्यम्। अतो न द्वितीयाध्यायेऽपि वेदान्तविरोधः। तृतीये 'दर्शनस्पर्शनाभ्यामेकार्थ-ग्रहणात्'[5] इत्यादिकं बाह्यान्तरिन्द्रियादिनिरूपणादिकञ्चात्यन्तोपयुक्तम्। न च मनोनित्यत्वादिकं तत्र सूत्रितम्; येन[6] तदुत्पत्तिवादिश्रुतिकोपः।

न ह्यत्र द्रव्यगुणादिपदार्थपरिसङ्ख्यानं क्रियत इति — 'धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्श्रेयसम्'[7] इति कणादसूत्र इवेति भावः। तथा सति हि सामान्यस्यातिरिक्तत्वमावश्यकम्।

तिसृणामेवेति — न त्वन्येषां पदार्थानामिति भावः। यद्वा तिसृणामेवं लक्षणमाहेति पाठः। नित्यानेकसमवेतत्वं जातिलक्षणतया नोक्तमिति भावः।

जातिलिङ्गमिति—जातिलिङ्गमिति आख्या यस्याः तथोक्ता जातिव्यञ्जिकेत्यर्थः।

समानप्रसवात्मिकेति — समानः—समानाकारः प्रसवः बुद्धिजननं येन तथोक्तः आत्मा स्वरूपं यस्याः सा समानप्रसवात्मिका। समानाकारप्रतीतिजनिका जातिरित्यर्थः।

---

1. न्या. द. 2-2-60
2. तिसृणामेवम्
3. न्या. द. 2-2-69 to 71
4. वस्तुस्वरूप ......
5. न्या. द. 3-1-1
6. तदुत्पत्त्यादि. पा.
7. वै. द. 1-1-4

यच्चात्रोक्तम् —'गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्' 'श्रुतिप्रामाण्याच्च' इति। एतदेव यथाश्रुतं सिद्धान्ततया स्वीकार्यम् । यदपि

गन्धक्लेदेत्यादि — क्लेदः—स्वेदः; पाकशब्देन उष्णस्पर्शो विवक्षितः । व्यूहः—उच्छवासनिश्वासादिः । अवकाशदानं — छिद्रम् ।

एतदेव यथाश्रुतं सिद्धान्ततया स्वीकार्यमिति — स्वारसिकप्रतीत्यनुरोधात् शरीरस्य पाञ्चभौतिकत्वमेव सिद्धान्तत्वेनाङ्गीकार्यम् । न तु [1] 'पार्थिवं गुणान्तरोपलब्धेः' इति प्रथमसूत्रोक्तं पार्थिवत्वमित्यर्थः । नानापक्षोपन्यासस्थले पूर्वपूर्वपक्षोपमर्देनैव उत्तरोत्तरपक्षावतारस्य ग्रन्थकारशैलीसिद्धतया सुतरां ऋषीणां तथैव शैलीदर्शनात् । श्रुतिप्रामाण्याच्चेति हेतोस्तत्रैवान्वयाच्चेति भावः । अनया वचोभङ्ग्या 'पार्थिवं गुणान्तरोपलब्धेः' 'पार्थिवाप्यतैजसं तद्गुणोपलब्धेः' 'निश्वासोच्छवासोपलब्धेः चातुर्भौतिकम्' 'गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्' । 'श्रुतिप्रामाण्याच्च' इति शरीरपरीक्षार्थं प्रवृत्तायां पञ्चसूत्र्यां पार्थिवं गुणान्तरोपलब्धेरिति प्राथमिकसूत्रमेव सिद्धान्तसूत्रम् । मतान्तराभिधानाय त्रिसूत्री । तानि च मतानि अतितुच्छत्वात्सूत्रकृता न दूषितानि । श्रुतिप्रामाण्याच्चेति चरमसूत्रोक्तहेतोः प्रथमसूत्रार्थेनैवान्वय इति व्याख्यातृभिः प्रतिपादितमत्यन्तमनुपपन्नमेवेति ज्ञापितम् । न च पाञ्चभौतिकत्वे जातिसङ्करप्रसङ्ग इति वाच्यम्; उपाधिसङ्करवज्जातिसङ्करस्याप्यदोषत्वात् । क्षत्रियायां ब्राह्मणोत्पन्नस्य ब्राह्मणत्वादिनिषेधपूर्वकजात्यन्तरप्रतिपादकागमबलादेव न ब्राह्मणत्वक्षत्रियत्वे । न च 'सूर्यं ते चक्षुर्गच्छतात्' इति मन्त्रे 'पृथिवीं ते शरीरं' इति श्रूयते । तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति शरीरस्य पार्थिवत्वं आवश्यकमिति श्रुतिप्रामाण्याच्चेत्यनेन सूत्रेण प्रतिपादनात्कथं शरीरस्य पाञ्चभौतिकत्वसम्भव इति वाच्यम् । तत्र पृथिवीशब्देन पञ्चीकृतव्यष्टिपृथिव्या एव विवक्षितत्वात् । सूर्यं ते

---

1. न्या. द. 3-1-27

'गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः'[1] 'अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः' इति गुणव्यवस्थापनम्, तत्र तु तथैवाभ्युपगमेऽपि न वस्त्वन्तर-

इत्यादि व्यष्टिसमभिव्याहारेण तथैवोपलब्धेः । वस्तुतस्तु पञ्चीकरणोपलक्षकत्रिवृत्करणश्रुतिरेव श्रुतिप्रामाण्यादित्यनेन विवक्षितेति तस्य पाञ्चभौतिकत्वव्यवस्थापकत्वमेवेति न काचिदनुपपत्तिः । उक्तं हि मोक्षधर्मे दशमाध्याये —

> चेष्टा वायुः खमाकाशं ऊष्माग्निः सलिलं द्रवः ।
> पृथिवी चात्र सङ्घातः शरीरं पाञ्चभौतिकम् ॥ इति ।

अत्र चेष्टा वायुरिति हेतुहेतुमतोरभेदोपचाराच्चेष्टया उच्छ्वासनिश्वासादिरूपया वायुर्ज्ञाप्य इत्यर्थः । खमाकाशमिति — छिद्रज्ञाप्यमाकाशमित्यर्थः । ऊष्माग्निः — उष्णस्पर्शग्राह्यं तेज इत्यर्थः । पृथिवी चेति — पृथिवीत्वेन प्रत्यक्षसिद्धमित्यर्थः । अत एव पृथिवीत्वे हेत्वनुक्तिः । न च श्रीमन्न्यायसिद्धाञ्जने 'शरीरत्वमस्या मनुष्यतिर्यक्स्थावरादिषु व्यक्तम्' इति मनुष्यशरीरस्य पार्थिवत्वाभिधानं कथं सङ्घटत इति वाच्यम् । 'वैशेष्यात्तु तद्वादः'[2] इति न्यायेन पृथिवीभागभूयस्त्वाभिप्रायेण तदुपपत्तेः । अनुगृहीतं हि तत्रैव — ब्रह्माण्डप्रभृतिस्तम्बपर्यन्तं सर्वमपि पञ्चभूतात्मकम्; पञ्चीकरणादिवचनात् । 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति उपलक्षणम् । समानप्रकरणे हि उपब्रह्मणैश्च तथाध्यवसायात् । भूयसा तु लौकिकपरीक्षकागमव्यवहाराः । तथा च सूत्रम् — 'वैशेष्यात्तु तद्वादस्तद्वाद' इति । 'त्र्यात्मकत्वात्तु भूयस्त्वात्' इति च इति ।

न वस्त्वन्तरविरोध इति — अवयव्यभ्युपगमे आरम्भणाधिकरणसमर्थनीयस्य कार्यकारणयोरनन्यत्वादेर्विरोधवत् यथाश्रुतसूत्रप्रतिपन्नरीत्यैव गुणव्यवस्थाङ्गीकारेऽपि सिद्धान्तसम्प्रतिपन्नार्थान्तरस्य न विरोध इत्यर्थः ।

---

1. न्या द. 3-1-62, 63
2. बा. सू. 2-4-19

विरोधः । तथाप्याकाशादिषु शब्दादेरेकद्वित्रिचतुष्पञ्चक्रमेण पुराणेषु पाठात्, आकाशानुप्रवेशादन्यत्र शब्द इति निर्वाहे वाय्वाद्यनुप्रवेशादुत्तरोत्तरेषु स्पर्शादिरिति निर्वोढुं शक्यत्वात्, उपलम्भान्वयव्यतिरेकाभ्यां व्यवस्थापनस्यापि

वस्त्वन्तरविरोधाभावेऽपि प्रमाणविरोधात् न तथा स्वीकारसम्भव इत्यभिप्रायेणाह — **तथापीत्यादि** ।

पुराणेषु पाठादिति । श्रीविष्णुपुराणे —

आकाशवायुतेजांसि सलिलं पृथिवी तथा ।
शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरैः ॥ इति ।

मोक्षधर्मे च —

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च भूगुणाः ।
शब्दः स्पर्शश्च रूपं च रसश्चापां गुणाः स्मृताः ॥
शब्दः स्पर्शश्च रूपं च त्रिगुणं ज्योतिरुच्यते ।
शब्दः स्पर्शश्च वायव्यः स्पर्शश्च बहुधा स्मृतः ॥
तत्रैकगुणमाकाशं शब्द इत्येव स स्मृतः । इति ।

एवमन्यत्रापि पाठादित्यर्थः । प्रत्यक्षतः पृथिव्यादिषु शब्दोपलम्भादित्यपि बोद्धव्यम् । ननु पृथिव्यादिषु शब्दोपलम्भः आकाशानुप्रवेशनिबन्धनः । पुराणेषु पाठोऽपि तदभिप्रायक एवेत्यत आह — **आकाशेति । उपम्लभान्वयव्यतिरेकाभ्यां व्यवस्थापनस्येति** — उपलम्भसद्भावासद्भावाभ्यां व्यवस्थापनस्येत्यर्थः । पृथिव्यादिषु हि प्रत्यक्षेण स्पर्शोपलब्ध्या तत्र तत्सत्त्वं आकाशे तदनुपलब्ध्या च तत्र तदभावः । एवं रूपादीनां पृथिव्यादिवृत्तित्वं वाय्वाद्यवृत्तित्वं च बोध्यमिति भावः ।

समत्वाद्गन्धादिसूत्रं पृथिव्यास्ते सन्त्येव इत्ययोगव्यवच्छेदेन निर्वाह्यम् । 'आकाशस्योत्तरः' इत्यत्र तु तस्य स एवेत्यन्ययोगव्यवच्छेदेन । कति कति चैवं सूत्राणि क्लिष्टानि परैरपि निरुह्यन्ते ।

यच्च — स्वगुणान्नोपलभन्त इन्द्रियाणि, कस्मादिति चेत् 'सगुणाना-मिन्द्रियभावात्'[1] इत्यत्र 'न शब्दगुणोपलब्धेः'[2] इत्युक्तम्; तत्रापि श्रोत्रेन्द्रिय-स्याकाशाप्यायितत्वादाप्यायकगुणस्य तद्गुणतां पटनैल्यपानीयसौरभादिवत्प्रक-ल्प्योक्तमुत्तरम् । अथवा यथागममाहङ्कारिकत्वमिन्द्रियाणामजानतश्चोद्ये

समत्वादिति । आकाशादिषु पञ्चस्वपि अविशेषेण प्रत्यक्षत एव शब्दोप-लम्भादिति भावः । क्लिष्टगत्याश्रयणमनुपपन्नमित्याशङ्क्य प्रमाणाविरोधाय अगत्या तदाश्रयणं सर्वेषामेव क्वचिदावश्यकमित्याह — **कति कतीति** ।

क्लिष्टानि परैरपि निरुह्यन्त इति । यथा 'साध्यत्वादवयविनि सन्देहः'[3] इति द्वितीयाध्यायस्थसूत्रे इत्थमुक्तं वृत्तिकारेण—अत्र अवयविनि सन्देहस्साध्यत्वादिति यथा-श्रुतार्थः न सङ्गच्छते; वह्न्यादौ व्यभिचारात् । तस्मादयमर्थः — अवयविनि साध्य-त्वात् असिद्धत्वात्सन्देहः अवयविसद्भावादित्युक्तहेतोः । तथा च सन्दिग्धासिद्धो हेतुरित्यर्थ इति ।

स्वगुणान्नोपलभन्त इन्द्रियाणि; कस्मादिति चेदिति — घ्राणादिनीन्द्रियाणि स्वगतान् गन्धादीन् गुणान् कुतो न गृह्णन्तीत्यर्थः । स्वगतगन्धादिसाक्षात्कारं कुतो न जनयन्तीति यावत् । अत्र चोद्ये उत्तरं **सगुणानामिन्द्रियभावादिति** —गुणविशिष्टाना-मेवेतरसाक्षात्कारहेतुत्वादित्यर्थः । कुङ्कुमगन्धाभिव्यञ्जकगोघृतादौ तथा दर्शनादिति भावः । **न शब्दगुणोपलब्धेरिति** — अत्र वात्स्यायनभाष्यम् — स्वगुणान्नोपलभन्त

1. न्या. द. (3-1-70)
2. ,, (3-1-72)
3. ,, (2-1-34)

[1] भूताप्यायितेन्द्रियपक्षे स्थित्वैवेदमुत्तरं गूढाभिप्रायेण दीयत इति। एतदुक्तं भवति—भवता किमिन्द्रियगुणोपलम्भाभाव उच्यते, किं वा तदाप्यायकगुणोपलम्भाभावः? पूर्वत्राङ्गीकार एवोत्तरम्; शब्दादीनामनिन्द्रियगुणत्वात्। उत्तरत्र व्यभिचार इति। अतो न वेदान्तविरोधप्रसङ्गः।

चतुर्थेऽध्याये प्रवृत्तिरागद्वेषादिनिरूपणमात्मनित्यत्वादिना प्रेत्यभावादिप्रतिपादनमनिमित्तभावोत्पत्तिसर्वानित्यत्वसर्वनित्यत्वादिनिराकरणञ्चात्यन्तानुगुणम्।[2] अवयविप्रसङ्गश्च प्रागुक्तन्यायेन नेतव्यः। पञ्चमस्तु जातिनिग्रहस्थानमात्रोपक्षीणो न क्वचित्तत्त्र उपकरोति। व्यवहाराङ्गविमर्शसौन्दर्यासौन्दर्यादिकं तु

इन्द्रियाणीत्येतन्न भवति; उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति। **गूढाभिप्रायेणेति** — आहङ्कारिकेन्द्रियवादे विकल्पेन परिहाराभिप्रायः गूढ इति भावः। तमेवाभिप्रायं प्रकटयति — **एतदिति**। **अनिन्द्रियगुणत्वादिति** — इन्द्रियाणामाहङ्कारिकतया भौतिकत्वाभावेन शब्दाद्यनाश्रयत्वादिति भावः। **उत्तरत्र व्यभिचार इति** — यत्रेन्द्रियत्वं तत्र स्वाप्यायकगुणग्राहकत्वाभाव इति नियमे स्वाप्यायकाकाशगुणभूतशब्दग्राहके श्रोत्रेन्द्रिये व्यभिचार इत्यर्थः।

अनिमित्तभावोत्पत्तीति — अकारणकार्योत्पत्तीत्यर्थः। **सर्वनित्यत्वादीत्यादिना** बाह्यार्थाभावादिकं गृह्यते। **अवयविप्रसङ्ग इति**— 'विद्याविद्याद्वैविध्यात्संशयः'[3] इत्यादिनावयविप्रस्ताव इत्यर्थः। **प्रागुक्तन्यायेनेति**—अवयविशब्देनासमवायिकारणतया पराभिमतसंयोगविशेषविशिष्टद्रव्यस्यैव विवक्षितत्वादिति भावः। **न क्वचित्तत्त्र उपकरोतीति** — तत्त्वनिर्णये न तस्योपयोग इत्यर्थः। तथा च तत्त्वनिर्णयाभिलाषिभिर्न तस्यादरणीयतेति भावः। तथापि व्यवहाराङ्गविमर्शसौष्ठवादिपरिज्ञानाय तदादरणमावश्यकमित्यत आह — **व्यवहारेति**। व्यवहारस्य—कथायाः अङ्गभूतो यो विमर्शः—प्रमाणो-

1. भूतेन्द्रियवादे
2. निरूपणञ्च
3. न्या. द. (4-2-4)

वास्तवलक्ष्यलक्षणयुक्त्यादिपरामर्शवैज्ञानिकैरर्थस्थितिमात्रानुसारादनादरणीयम् । यत्पुनरर्वाग्भिरक्षचरणपश्चाध्याय्यां कुशकाशावलम्बेन कणचरणकथां निवेश्य नैगमिक्यः पदव्यो निरुद्ध्यन्ते, तत्र तु नूनं स एव गौतमः स्वयमन्तः प्रहसति ।

इति स्वीकारपक्षः ॥

यद्वा —

नातीव च बहिष्कारो नातीव च परिग्रहः ।
साङ्ख्यादिवदिहापि स्यात्समाधिस्तौषतण्डुलः ॥

पन्यासादिः तस्य सौन्दर्यं — छलादिराहित्यं असौन्दर्यं — तद्वत्ता । आदिशब्देन निग्रहस्थानादिराहित्यरूपपुरुषातिशयादिकं गृह्यते । **वास्तवेति** — प्रामाणिकेत्यर्थः । लक्ष्यलक्षणयुक्तितदाभासनिरूपणप्रवीणैः अर्थतत्त्वस्यैवानुसरणीयतया व्यवहारादिगुणागुणानां नादरणीयतेत्यर्थः । **कुशकाशावलम्बेनेति** — कतिपयार्थसंवादरूपदुर्बलयुक्त्यवलम्बनेनेत्यर्थः । यद्वा मुख्यकल्पासम्भवेऽनुकल्पावलम्बनन्यायेनेत्यर्थः । अयं भावः — अक्षपादसूत्रोक्तग्रहणं मुख्यकल्परूपम् । तदनुक्तविषये तत्सन्निहितकणादसूत्रोक्तग्रहणमनुकल्परूपम् । न तु साङ्ख्याद्युक्तग्रहणं तथेति । **कणचरणकथां निवेश्येति** — 'धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायादीनां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम्' 'पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि' इत्यादिकणादसूत्रोक्ताप्रामाणिकार्थानन्तर्भाव्येत्यर्थः । **निरुद्ध्यन्त इति** — श्रुत्यादिविरुद्धाकाशादिनित्यत्वप्रतिपादनादिति भावः ।

ननूक्तरीत्या गौतमीयन्यायविस्तरस्य कार्त्स्न्येन स्वीकारे कणभक्षाक्षपादेत्यादिभाष्यविरोध इत्याशङ्क्याह — **यद्वेति** । **साङ्ख्यादिवदिति** । यथा साङ्ख्योक्तं प्रकृत्यादिकं स्वीकृत्य तदुक्तं ईश्वरानधिष्ठितत्वादिकं निराक्रियते, तथा अक्षपादोक्तं प्रमाणादिविवेकं स्वीकृत्य तदुक्तमिन्द्रियभौतिकत्वादिकं निराक्रियते । **समाधिस्तौषतण्डुल इति** — अन्नार्थिभिर्व्रीह्युपादानेऽपि तुषांशपरित्यागेन तण्डुलांशग्रहणवद्विद्यास्थानत्वेन गौतमीयन्यायविस्तरस्य परिग्रहेऽपि श्रुत्यादिविरुद्धांशपरित्यागेनाविरुद्धावश्यकांशग्रहणं युक्तमेवेत्यर्थः ।

उपजीव्यबहुत्वेन विद्यास्थाननिवेशनम् ।
विरुद्धांशैकविषया सूत्रादिषु बहिष्क्रिया ॥

॥ अधिकारिविवेचनम् ॥

नियताधिकारश्चायं न्यायविस्तरः ।

अधिकाराच्च नियतः स्यादयं न्यायविस्तरः ।
अप्रत्यवायो माहात्म्याद्दयालुश्शास्त्रमब्रवीत् ॥
सर्वाधिकारमित्येतदसमीक्षितभाषितम् ।
कथमागमवृत्तान्तमनधीतागमा विदुः ॥

ननु तर्हि गौतमीयस्य विद्यास्थाननिवेशनानुपपत्तिः, न हि साङ्ख्यादिकं विद्यास्थानेषु निवेश्यते अत आह — **उपजीव्यबहुत्वेनेति**— साङ्ख्याद्यपेक्षयेति भावः । ननु तर्हि धर्मविद्यास्थानत्वेन परिगणितस्य पुराणादिवन्न बहिष्कारसम्भव इत्यत आह — **विरुद्धांशैकविषयेति । बहिष्क्रियेति** — बहिष्कारश्चात्र प्रमाणादिसंव्यवहारव्यवस्थापनमात्रेदम्परस्य न्यायविस्तरस्य न तत्त्वेदम्पर्यम् । अतो न पुराणादिविरुद्धेन्द्रियभौतिकत्वादौ प्रमाण्यमित्येवं प्रतिपादनमेव ।

नियताधिकार इति — त्रैवर्णिकानामेव न्यायविस्तरेऽधिकारो न तु शूद्रादीनामित्यर्थः । ननु गौतमः स्वमाहात्म्यात् स्वस्मिन् स्वसम्बन्धिषु च प्रत्यवायरहितस्सन् कारुणिकतया सर्वाधिकारं शास्त्रमुपदिष्टवानिति गौतमीयैरभिधीयते । तत्कथमस्य नियताधिकारत्वमुच्यत इत्यत आह—**अप्रत्यवाय इति**—स्वस्मिन् स्वसम्बन्धिषु च प्रत्यवायरहित इत्यर्थः । माहात्म्यात् — 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इत्युक्तान्निषिद्धाचरणेऽपि प्रत्यवायानुत्पत्तिप्रयोजकात्तपोविशेषजनितादृष्टविशेषरूपादुत्कर्षात्सर्वाधिकारं शास्त्रमादिशदित्यन्वयः । **असमीक्षितभाषितमिति** । सर्वाधिकारत्वानुपपत्तीनां वक्ष्यमाणानामनालोचनादिति भावः । शूद्राद्यधिकारानुपपत्तीरेव दर्शयति — **कथमित्यादि** ।

आगमवृत्तान्तमिति — वेदोक्तमर्थमित्यर्थः । वेदातिरिक्तानां दशानामपि विद्यास्थानानां वेदार्थनिर्णयोपयोगितयैव प्रामाण्यादिति भावः । केचित्तु प्रत्यक्षादि-

निषिद्धे प्रेरयंस्तान्वा कथं कारुणिको भवेत् ।
न च शक्या नरशिरःपावित्र्याद्यनुमाक्षतिः ॥
विहायागममक्षाद्यैर्द्विधा[1] तत्रापि विप्लवः ।

प्रमाणानां न्यूनाधिकविभागाक्षेपस्य तर्कसहकृतेन 'श्रुतिःप्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्' इत्यागमेन निरसनीयत्वादनधीतागमानां शूद्राणामधिकारो न सम्भवतीत्यर्थ इत्याहुः । ननु शूद्रादिभिः वेदाध्ययनमपि कृत्वा न्यायविस्तरेऽधिकर्तव्यमित्येव गौतमाभिप्राय इत्यत आह — **निषिद्ध इति** 'पद्युह वा एतत् श्मशानं यच्छूद्रः । तस्माच्छूद्रसमीपे नाध्येतव्यम्' 'अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रपूरणमुदाहरणे जिह्वाच्छेदः, धारणे शरीरभेदः' 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इत्यादिभिर्निषिद्धे वेदाध्ययन इत्यर्थः । तान्—शूद्रादीन् । वेदार्थनिर्णयरूपप्रयोजनासम्भवान्न्यायविस्तरे शूद्रादीनामनधिकार उक्तः । अथ क्वचिन्न्यायविस्तरार्थज्ञानस्यैवासम्भवात्तेषां तत्रानधिकार उच्यते — **न चेति** । **नरशिरःपावित्र्याद्यनुमाक्षतिः** 'नरशिरःकपालं शुचि, प्राण्यङ्गत्वात् शङ्खवत्' 'शूद्रादयः वेदाध्ययनाधिकारिणः, मनुष्यत्वाद्ब्राह्मणवत्' इत्यनुमानानां कालात्ययापदिष्टत्वप्रतीतिः । **विहायागममिति** ।

नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेत् ।
स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ॥

इत्याद्यागममन्तरेणेत्यर्थः । **अक्षाद्यैः** - प्रत्यक्षाद्यैः । परमते उपमानप्रामाण्यात्सिद्धान्तिमते स्मृतिप्रामाण्याच्च बहुवचनोपपत्तिः । विहायागममक्षाद्यैर्न शक्येत्यन्वयः । सम्पादयितुं जनयितुं वा न शक्येत्यर्थः । तथा च न्यायविस्तरेण प्रतिपिपादयिषितस्य उक्तानुमाने कालात्ययापदिष्टत्वस्य शूद्रादिभिर्ज्ञातुमशक्यतया न तेषां तत्राधिकारसम्भव इति भावः । शूद्रादीनां न्यायविस्तराधिकारासम्भवमुपपाद्य, अधिकारस्वीकारे बाधकमप्याह — **द्विधेति** । **तत्रेति** — शूद्रादीनां न्यायविस्तराधिकार इत्यर्थः । द्विधापीत्यन्वयः । विप्लवोऽपीति वा । विप्लवोऽपीत्यपिना पूर्वोक्तासम्भवस्समुच्चीयते

1. अक्षादिधिया

श्रुत्यां ह्यनधिकारित्वात्तदन्यत्राव्यवस्थितेः ॥
धर्मक्षोभानुमाभङ्गे कथं शूद्रादयः क्षमाः ।
अथ त्रैवर्णिकैरुक्ते त्वन्यो विश्वसितीत्यपि ॥
स्वयं न्यायविचारेऽस्य फलत्यनधिकारिताम्[1] ।

द्विधा — शूद्रादीनामागमाध्ययने तदनध्ययने च । विप्लवः — निषिद्धानुष्ठानप्रसङ्गः । आगमानध्ययने नरशिरःकपालशुचित्वानुमाने बाधितत्वज्ञानासम्भवात्तादृशानुमानबलेन शुचित्वं ज्ञात्वा तत्स्पर्शादिरूपनिषिद्धानुष्ठानं प्रसज्यते । आगमाध्ययने च तदेव निषिद्धमिति । एतदेवोपपादयति — **श्रुत्यामित्यादिना** । **अनधिकारित्वादिति** । तथा च तदनध्ययने निषिद्धानुष्ठानप्रसङ्गो दुर्वार इति भावः । निषिद्धानुष्ठानप्रसङ्गमुपपादयति — **तदन्यत्रेति** — श्रुत्यतिरिक्तेषु प्रत्यक्षादिष्वित्यर्थः । **अव्यवस्थितेरिति** — धर्माधर्मव्यवस्थापकत्वासंभवादित्यर्थः । **धर्मक्षोभानुमाभङ्ग इति** — निषिद्धानुष्ठानसंपादकस्य नरशिरःकपालं शुचि, प्राण्यङ्गत्वाच्छङ्खवदित्याद्यनुमानस्य कालात्ययापदिष्टत्वज्ञान इत्यर्थः । **कथं शूद्रादयः क्षमा इति** । तथा चानधीतवेदानां तेषां न्यायविस्तराधिकारस्वीकारे उक्तानुमाने समीचीनत्वज्ञानात्तेषां नरशिरःकपालस्पर्शादिरूपनिषिद्धानुष्ठानप्रसङ्गो दुर्वार इति भावः । शूद्रादय इत्यादिना 'ब्राह्मण्यां क्षत्रियात्सूतः वैश्याद्वैदेहकस्तथा' इत्याद्युक्तप्रतिलोमानां सङ्ग्रहः । ननु त्रैवर्णिकोक्त्योक्तानुमानानां कालात्ययापदिष्टत्वं सुगममित्याशङ्क्याह — **अथेति** । अन्यः - शूद्रः । **विश्वसितीत्यपीति** — विश्वसितीत्येवमभिधानमपीत्यर्थः । **स्वयमिति** — त्रैवर्णिकनैरपेक्ष्येणेत्यर्थः । **अनधिकारितां फलति** — अनधिकारितां सम्पादयतीत्यर्थः । 'फलति फलमनेकं त्वत्पदे भक्तिरेका' इति सकर्मकतया प्रयोगात् । फलत्यनधिकारितेति पाठे इत्यपीत्यस्य इत्यभिधानेऽपीत्यर्थः । फलतीत्यस्य तु फलं भवति पर्यवस्यतीत्यर्थो बोध्यः । ननु विचारे शूद्रस्यानधिकारेऽपशूद्राधिकरणभाष्ये शूद्रादीनामपि तर्कानुगृहीतात्प्रत्यक्षादनुमानाच्च निर्विशेषस्वप्रकाशचिन्मात्रप्रत्यग्वस्तुन्यज्ञानसाक्षित्वादिनिश्चयसंभवाभिधानं कथं सङ्घटत इत्यत आह —

1. अनधिकारिता

प्रत्यक्षानुमयोर्यत्र नित्यं वेदानपेक्षता ॥
तत्रापशूद्रभाष्योक्ता शूद्रादेरप्यधिक्रिया ।
चतुर्दशापि स्थानानि भगवान् धर्मविद्ययोः ॥
न स्प्रष्टव्यानि शूद्रैरित्यब्रवीदाश्रमोधिके ।

प्रत्यक्षेति । **नित्यमिति** — नियमेनेत्यर्थः । **वेदानपेक्षता** — उपकार्यतया उपकारकतया वेति भाव्यम् । यत्र वेदार्थनिर्णयाय न्यायविचारः क्रियते तत्रोपकार्यतया वेदापेक्षा । नरशिरःकपालपवित्रतानुमान इव यत्राभासत्वज्ञानं वेदमन्तरा न भवति तत्रोपकारकतया वेदापेक्षा । द्विविधापि वेदापेक्षा यत्र न्यायविचारे नास्ति तत्रैव शूद्रादीनामधिकारसंभवो भाष्येऽभिहितः । न्यायविस्तरे तु द्विविधापि वेदापेक्षास्तीति न तत्र शूद्रादीनामधिकार इति भावः । एतावता शूद्रादीनां वेदानधिकारनिबन्धनो न्यायविस्तरानधिकार उक्तः । अथ वेद इव साक्षदेव निषेधान्न तत्राधिकार इत्याह — **चतुर्दशापीति** । न केवलं वेदमात्रमिति भावः । धर्मविद्ययोः **स्थानानि** — 'धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वाज्जपादिना स्वरूपेणापि तत्साधनत्वाच्च' इति जिज्ञासाधिकरणभाष्योक्तरीत्या धर्मशब्दितपुरुषार्थसाधनभूतादृष्टविशेषस्य धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनज्ञानस्य च साधनानि

'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश'[1] ॥

इति याज्ञवल्क्योक्तनि पुराणादीनि । **भगवान्** — सार्वज्ञ्यसर्वशक्त्यादिकल्याणगुणपरिपूर्णः, अश्रितविषये विप्रलिप्सादिदोषदूरश्च ।

'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः' ॥ इति ह्युच्यते ।

अनेनाप्ततमत्वं दर्शितं भवति । **न स्प्रष्टव्यानीति** — नोच्चारणीयानीत्यर्थः ।

1. या. स्मृ. (1-3)

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ॥
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।
यान्युक्तानि मया सम्यग्विद्यास्थानानि भारत ॥
उत्पन्नानि पवित्राणि पावनार्थं तथैव च ।
तस्मात्तानि न शूद्रस्य स्प्रष्टव्यानि कथञ्चन ॥ इति ।

तस्मादेतानि त्रैवर्णिकैरध्येतव्यानि । तत्र ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाधिगन्तव्यानि । क्षत्रियवैश्याभ्यां धर्मानुष्ठानायैव । तथा शङ्खेन विद्यास्थानान्यनुक्रम्योक्तम् — 'एतानि ब्राह्मणोऽधिकुरुते । स च वृत्तिं दर्शयतीतरेषाम्' इति । एवमेव धर्मशास्त्रसङ्ग्राहकैः समर्थितम् । ततश्च येषां कर्मब्रह्ममीमांसावसेयतत्त्वहितरूपप्रमेयाचिन्ताधिकारस्तेषामेव तात्पर्यपर्यवसायितया धर्मविद्यास्थानाभिमतन्यायविस्तराधिकार इति सिद्धम् ।

अङ्गानीत्यादिकमाश्वमेधिकवचनम् । अङ्गानि —

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ।

इत्युक्तानि । **मीमांसा** — वेदवाक्यविचारः । **पुराणं** — ब्राह्मादि । **धर्मशास्त्रं** — मानवादि । **विद्याः** — पुरुषार्थसाधनीभूतज्ञानहेतवः । **पवित्राणि** — वेदवच्छूद्रादिस्पर्शाक्षमाणि । **पावनार्थं** — अध्येतॄणां श्रोतॄणां च पापनिवृत्त्यर्थम् । **विद्याप्राप्तय इति** — अन्येषां विद्यासंबन्धसिद्धय इत्यर्थः । प्रवचनायेति यावत् । **धर्मशास्त्रसङ्ग्राहकैरिति** — विज्ञानेश्वरादिभिरिति भावः । अधिकारिनिरूपणमुपसंहरति — **ततश्चेति** — शूद्रादीनां वेदार्थनिर्णयरूपप्रयोजनासंभवात् क्वचित्प्रतिपिपादयिषितार्थज्ञानस्यैवासंभवान्निषिद्धानुष्ठानप्रसङ्गरूपबाधकसद्भावात्साक्षान्निषेधाच्चेत्यर्थः ।

तात्पर्यपर्यवसायितयेति — तात्पर्यविषयीभूतप्रयोजनवत्तयेत्यर्थः । अनेन वेदपरिकरभूतविद्यास्थानेषु शूद्रादीनामनधिकारे तात्पर्यविषयीभूतप्रयोजनासंभव एव मुख्यो हेतुः । साक्षान्निषेधोऽपि एतदभिप्रायक एवेति दर्शितम् ।

॥ श्रीगुरुभ्यो नमः ॥

॥ विधिविमर्शः ॥

(पूर्वतोऽनुवृत्तः)

पण्डितराजः वे. सुब्रह्मण्यशास्त्री

अण्णामलैविश्वविद्यालयः

(७) विशेष्यतया नञ्समभिव्याहृताख्यातार्थकृतिप्रकारकशाब्दबोधे विशेष्यतया नञ्पदजन्योपस्थितिः कारणम्। चैत्रो न पचतीत्यादौ कृतिविशेष्यतया नञर्थाभावभानात् इत्येवं सप्त कार्यकारणभावाः कल्पनीयाः तैः।

अपि च नञ्समभिव्याहारे बलवदनिष्टाननुबन्धित्वरूपलिङर्थस्यैव नञर्थेऽभावे अन्वयः। तद्भिन्नलिङर्थस्य इष्टसाधनत्वादेः सर्वत्र धात्वर्थ एवान्वयः| नञसमभिव्याहारे तु सर्वस्यापि लिङर्थस्य धात्वर्थेऽन्वयः। लिङसमभिव्याहारे नञर्थस्य प्रथमान्तार्थेऽन्वयः लिङ्समभिव्याहारे तु धात्वर्थे इति तत्तद्बोधं प्रति तादृशतादृशसमभिव्याहारज्ञानानां अनन्ताः कार्यकारणभावाः कल्पयितव्याः इति च गौरवमापतति।

अस्मन्मते तु नञः असत्त्वे लिङर्थः प्रयोज्यतासंबन्धेन, नञः सत्त्वे च स्वप्रयोज्याभावप्रतियोगित्वसंबन्धेन, प्रथमान्तार्थः आधेयतासंबन्धेन, नञर्थः प्रतियोगितासंबन्धेन च आख्यातार्थकृतावन्वेति इति चत्वार एव कार्यकारणभावाः। अथवा विशेष्यतया सुबर्थलिङ्गसंख्याव्यतिरिक्तप्रातिपदिकार्थव्यतिरिक्तार्थप्रकारकशाब्दबोधं प्रति भावनाविशेष्यतासंबन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणमित्येक एव कार्यकारणभावः कल्प्यते इति लाघवं स्फुटमेव।

अपि च न्यायमते हि यजेत इत्यत्र धात्वर्थो यागः आख्यातसामान्यार्थकृतावनुकूलतासंबन्धेनान्वेति। एवं च तुल्यवित्तिवेद्यतया धात्वर्थे कृतिसाध्यत्वं भासते। अतः कृतिसाध्यत्वमप्यन्यलभ्यं न लिङर्थः।

यदप्युच्यते नव्यतार्किकैः, इष्टसाधनत्वमात्रं लिङर्थः न कलञ्जं भक्षयेदित्यादौ तृप्तिसाधने धात्वर्थे लिङर्थस्येष्टसाधनत्वस्याभावबोधो न संभवतीति लिङः अनिष्टसाधनत्वे लक्षणा। तादृशार्थे लक्षणातात्पर्यग्राहकमेव नञ्पदम्। अनिष्टसाधनत्वञ्चाश्रयतया धात्वर्थे अन्वेति इति।

तदप्यसङ्गतम् ।

राजप्रेरितोऽहं गामानयामि- इति राज्ञि प्रवर्तकत्वव्यवहारोऽस्ति । निरूपितञ्च प्रवर्तकत्वं प्रवृत्तिकारणज्ञानविषयेच्छाश्रयत्वमेवेति । तस्याश्चेच्छायाः लिङादिनैव बोधः इति सैव लिङ्वाच्या । तया चेष्टसाधनत्वमनुमातुं शक्यमिति अन्यलभ्यमिष्टसाधनत्वं न लिङर्थः अनन्यलभ्यः शब्दार्थः इति न्यायात् ।

अपि च यत्र चैत्रः स्वत एव पाकमिष्टसाधनं बुध्वा पचति, तत्र पाककृतेर्वर्तमानतादशायां चैत्रः पचेदिति प्रयोगः आपद्येत । इष्टसाधनपाकानुकूलकृतिमांश्चैत्रः इत्याकारके तद्वाक्यजबोधे विषयस्य तादृशपाककृतेः चैत्रे अबाधात् । अस्मन्मते तु तादृशचैत्रीयपाककृतेः लिङर्थप्रेरणाप्रयोज्यत्वाभावेन विषयबाधान्न तादृशप्रयोगापत्तिः । अन्यदीयप्रेरणाप्रयोज्यप्रवृत्तिवर्तमानतादशायां चैत्रः पचेत् इति प्रयोगस्तु प्रेरणायाः आख्यातार्थकृतौ संबन्धविशेषनिरूपणेनैव निरस्तः ।

यच्चोक्तं निषेधस्थले लिङः अनिष्टसाधनत्वे लक्षणेति । तदपि न ।

तथा सति ज्योतिष्टोमेन न यजेत इति वाक्यप्रयोगोऽपि प्रामाणिकः स्यात् । तद्वाक्यजन्ये अनिष्टसाधनज्योतिष्टोमयागानुकूलकृतिमानिति बोधे विषयस्याबाधात् । यागे तात्कालिकश्रमादिरूपानिष्टसाधनत्वस्य सत्त्वात् । न च नरकरूपानिष्टसाधनत्वमेव निषेधस्थले लिङा बोध्यते । तच्च ज्योतिष्टोमे बाधितमिति न तस्य प्रामाण्यापत्तिरिति वाच्यम् । तथा सति अग्निं न स्पृशेत् इति वाक्यस्याप्रामाण्यापत्तेः अग्निस्पर्शे नरकसाधनत्वबाधात् । किञ्च नातिरात्रे षोडशिनं गृह्णाति इत्यत्र नरकसाधनत्वं न बोधयितुं शक्यते अप्रामाणिकत्वात् । नापि तात्कालिकश्रमादिरूपानिष्टसाधनत्वं, तथात्वे तद्वाक्यस्य अनुवादकतासंभवेऽपि, अतिरात्रे षोडशिनं गृह्णाति इति विधिना

इष्टसाधनत्वबोधनात् सर्वदा अतिरात्रे षोडशिग्रहणं कर्तव्यमित्यापतति । यदि चानुवादकतापरिहाराय क्रतुवैगुण्यरूपानिष्टसाधनत्वमेव नातिरात्रे इति वाक्येन बोध्यते इत्युच्यते । तदा एकस्यैव षोडशिग्रहणस्य क्रतुसाद्गुण्यजनकत्वं क्रतुवैगुण्यजनकत्वञ्च विरुद्धं न संभवति । तस्मान्न निषेधस्थले अनिष्टसाधनत्वं लिङा बोध्यते इत्युक्तिः समञ्जसा ।

अस्माकं तु मते यत्र विध्युत्तरं निषेधः तत्र लिङ्बोध्यनिवर्तनया धात्वर्थे इष्टसाधनत्वाभावस्याक्षेपः । विधिनिषेधयोर्द्वयोरपि वैदिकत्वे षोडशिग्रहणे इष्टसाधनत्वं तदभावश्च प्रयोगभेदेनोपपद्येते । एवञ्च ज्योतिष्टोमेन यजेतेति विध्युत्तरं प्रवृत्तेन ज्योतिष्टोमेन न यजेत इति निषेधवाक्येनावगतनिवर्तनया तत्र इष्टसाधनत्वाभावः आक्षिप्येत । ज्योतिष्टोमे च इष्टसाधनत्वाभावः श्रुतिविरोधेन बाधितः इति तद्वाक्यमप्रमाणं भवति ।

अपि च चैत्रः कीदृशः इति प्रश्ने चैत्रो न कलञ्जं भक्षयेदित्युत्तरयितुः असंबद्धप्रलापित्वं न स्यात् । बलवदनिष्टजनककलञ्जभक्षणानुकूलकृतिमानिति वाक्यं तस्योत्तरं भवति । तत्समानार्थकं न कलञ्जं भक्षयेदिति वाक्यमिति तस्य सदुत्तरत्वापत्तेः । अस्मन्मते च न कलञ्जमित्यादि वाक्यं कलञ्जभक्षणप्रवृत्तौ स्वज्ञानविशेषाधीनानुमितिप्रयोज्याभावप्रतियोगित्वसंबन्धेन निवर्तनावत्त्वं बोधयतीति तस्योत्तरत्वमेव न प्रसज्यते । किञ्च चैत्रः कीदृशः इति प्रश्नस्य चैत्रमुख्यविशेष्यकबोधजनकमेवोत्तरं भवितुमर्हति । न ह्यस्मन्मते निरुक्तवाक्याच्चैत्रमुख्यविशेष्यको बोधः । अपि तु कृतिमुख्यविशेष्यक एवेति न तस्योत्तरत्वं प्रसज्यते । न च तर्हि भवन्मते कीदृशी कृतिरिति प्रश्ने न कलञ्जं भक्षयेत् इत्युत्तरं वक्तुः असंबद्धप्रलापित्वं न स्यात् तस्य

कृतिमुख्यविशेष्यकबोधजनकत्वादिति वाच्यम् । कीदृशी कृतिरिति प्रश्नः स्त्रीलिङ्गविशिष्टकृतिविषयकः कृतिशब्देन लिङ्गविशेषस्याप्युपस्थापनात् । स्त्रीलिङ्गविशिष्टकृतिमुख्यविशेष्यकबोधजनकमेव तस्योत्तरं भवितुमर्हति । आख्यातोपात्तकृतिस्तु न लिङ्गान्वयिनी । आख्यातस्य लिङ्गाबोधकत्वात् । एवञ्च स्त्रीलिङ्गविशिष्टकृतिमुख्यविशेष्यकबोधाजनकं नं कलञ्जमित्यादि वाक्यं न तस्य प्रश्नस्योत्तरम् । तस्माल्लिङर्थः प्रवर्तना । सा च लोके पुरुषाभिप्रायः अपौरुषेये वेदे लिङादिनिष्ठः अलौकिको व्यापारः इति निरूपयन्ति ।

महाभाष्यस्वरसप्रमाणकाः **नव्यवैयाकरणाः**, विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रात् विध्यादयः लिङोऽर्थाः । तत्र विधिः प्रेरणा । यथा निकृष्टस्य भृत्यादेः स्वामिना स्वाभिलषिते प्रेरणम् । इयमेवाज्ञा । यथा स्वर्गकामो यजेत, अनेन पथा याहि इत्यादि । महाभाष्यकारः विधिनिमन्त्रणेत्यादिसूत्रे विधिः प्रेरणमिति बभाषे । न्यायभाष्यकारः वात्स्यायनोऽपि विधिर्नियोगः इत्याह । नियोगः नियोजनम् नियोजयतीत्यादिप्रतिपाद्यः प्रवर्तकनिष्ठव्यापारविशेषः । अत एव भगवान् पाणिनिः विधिपदार्थं तद्विशेषनिमन्त्रणादिभिः विधिनिमन्त्रणेति सूत्रे विवृणोति । निमन्त्रणं नाम श्राद्धादिभोजनानुकूलः प्रयोजकनिष्ठो व्यापारः निमन्त्रयते इति वाक्यात्तथा प्रतीतेः । विधिपदार्थस्य प्रवर्तकनिष्ठप्रवृत्त्यनुकूलव्यापाररूपत्वे एव निमन्त्रणादेः विधिपदार्थत्वं संभवति । हरिरप्याह 'अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि' इति ।

प्रवर्तकत्वञ्च लिङाद्युच्चारयितृत्वे सति स्वतन्त्रत्वम् । स्वतन्त्रत्वोपादानात् न लिङुच्चारयितुः राजप्रेरितस्य पदातेः प्रवर्तकत्वापत्तिः । लोके गामानयेत्यादिशब्दोच्चारयितुः प्रवर्तकस्य व्यापारः तादृशशब्दप्रयोगः प्रेरणा । अथ वा प्रयुज्यमानः

लिङन्तशब्दः प्रेरणा । सैव लिङर्थः । स च स्वप्रयोक्तृत्वसंबन्धेन प्रवर्तकपुरुषवृत्तिः । वेदे तु प्रवर्तकः यजेतेत्येवमादिः लिङन्तशब्द एव । अपौरुषेयत्वाद्वेदस्य लोके इव पुरुषविशेषस्य प्रवर्तकत्वासंभवात् । लिङर्थः प्रेरणापि स एव लिङन्तशब्दः । न च प्रवर्तकनिष्ठस्यैव प्रवृत्त्यनुकूलव्यापारस्य प्रेरणात्वात् वैदिकलिङन्तशब्दस्य चातथाभूतस्य कथं प्रेरणात्वम्? न हि स्वात्मकप्रवर्तकनिष्ठत्वं तस्य संभवतीति वाच्यम् । यथा अधिकरणस्वरूपस्यापि घटाभावादेः घटाभावत्वादिना भूतलवृत्तित्वं तथैव प्रेरणात्वेन रूपेण स्वात्मकप्रवर्तकनिष्ठत्वं वैदिकलिङन्तशब्दरूपप्रेरणायाः संभवति । लिङ्पद-प्रवृत्तिनिमित्तं प्रेरणात्वञ्च प्रेरयत्यादिधात्वर्थतावच्छेदकतया सिद्धः अखण्डो धर्मः । इमां प्रेरणां शब्दरूपत्वात् शाब्दी भावनेति व्यवहरन्ति । प्रेरणात्वेन रूपेण सविषया चेयं शब्दरूपा प्रेरणा लिङ्गसङ्ख्यान्वयायोग्यत्वात् व्यापारव्यपदेशं भजते । एवञ्च पचेदित्यादौ प्रेरणाविषयः पाकः इति शाब्दबोधः ।

यत्तूक्तम्, प्रवृत्तिहेतुज्ञानविषयः प्रवर्तना प्रेरणेति चोच्यते । प्रवृत्तौ इष्टसाधनता-ज्ञानं हेतुरिति तद्विषयः इष्टसाधनत्वमेव प्रेरणा । न च भवत्प्रेरणया अहमध्यापयामि

यद्यपि नागेशभट्टैः लघुमञ्जूषायां (९५९ पृष्ठे) वेदे प्रवर्तना लिङ्घटितत्वरूपा प्रवर्तकत्वञ्च शब्दनिष्ठमेवेत्यभिहितम् । तथापि निगमने प्रेरणात्वेन शब्दनिष्ठत्वादेरुपपादनात् शब्दरूपत्वेन शाब्दी भावनेति व्यपदेशसमर्थनाच्च लिङन्तशब्द एव तत्रापि प्रेरणेति तेषामाशयोऽवगम्यते । अत्र तु प्रवर्तकनिष्ठत्वमुपपादयद्भिः तैः शब्दनिष्ठं लिङ्घटितत्वमित्युक्तम् । परं तु धर्मधर्मिणोस्तादात्म्यात् तन्मते लिङ्घटितत्वस्यापि घटितशब्दरूपत्वमेवेति न पूर्वापरसन्दर्भविरोधः इति बोध्यम् ॥

न किञ्चिन्ममेष्टमिति व्यवहारदर्शनात् इष्टसाधनत्वातिरिक्ता सेति वाच्यम् । क्वचित् साक्षात् इष्टसाधनताज्ञानात्प्रवृत्तिः । क्वचित् परम्परया । न मे अध्यापनेन साक्षात्किञ्चिदिष्टमित्यभिप्रायेण निरुक्तव्यवहारः प्रवर्तते । तस्मात् इष्टसाधनत्वमेव प्रेरणात्वेन लिङर्थः इति ।

तदसङ्गतम् —

प्रवृत्तौ एतत्फलसाधनमिदं कृतिसाध्यं भवतु इतीच्छारूपा चिकीर्षैव हेतुः । तया चेष्टसाधनताज्ञानमन्यथासिद्धमिति न प्रवृत्तिहेतुः । अतश्च नेष्टसाधनत्वं प्रवर्तना प्रवृत्तिहेतुज्ञानाविषयत्वात् । न चेष्टसाधनताज्ञानं चिकीर्षाद्वारैव प्रवृत्तिं जनयति । एवञ्च व्यापारेण व्यापारिणो नान्यथासिद्धिरिति न्यायात् व्यापारेण चिकीर्षया व्यापारिणः इष्टसाधनताज्ञानस्य नान्यथासिद्धिः संभवतीति वाच्यम् । यत्र व्यापारिणः कारणत्वं प्रमाणान्तरेणावगतं, अवगतकारणत्वनिर्वाहाय च व्यापारः कल्प्यते, तत्रैव व्यापारेणेत्यादिन्यायः प्रवर्तते । यथा यजेत स्वर्गकामः इति श्रुत्या स्वर्गसाधनतयावगतस्य यागस्य आशुविनाशिनः कालान्तरभाविस्वर्गाव्यवहितपूर्ववृत्तित्वरूपकारणत्वानुपपत्त्या अपूर्वं व्यापारः कल्प्यते । तत्र अपूर्वेण व्यापारेण यागस्य व्यापारिणः न स्वर्गे अन्यथासिद्धिः । नत्वन्यत्र मानाभावात् । एवञ्चेष्टसाधनताज्ञानं चिकीर्षया प्रवृत्तावन्यथासिद्धमेव ।

किञ्च यागः इष्टसाधनं कृतिसाध्यः नाप्यत्र दुःखं तस्मात्त्वं कुरु इति स्वारसिको व्यवहारः प्रामाणिकानां दृश्यते । यदि लिङा इष्टसाधनत्वं बुध्यते । तदा यागः

इष्टसाधनमिति वाक्येनैव तस्य बोधितत्वात् पुनः त्वं कुरु इति विधिप्रत्ययेन तद्बोधने पौनरुक्त्यं दोषः आपतति । न च वारद्वयमभिहितमिष्टसाधनत्वं दृढीकृतं भवतीति सर्वथा इष्टसाधनत्वबोधनाय त्वं कुर्वित्युक्तिरिति वाच्यम् । तथापि तस्मादित्यनेन हेतुहेतुमद्भावबोधनासङ्गतेर्दुर्वारत्वात् । न ह्यभेदे हेतुहेतुमद्भावः क्वचिदपि संभवति ।

अपि च राज्ञा प्रवर्तितोऽहं कुर्वे इत्यादिव्यवहारात् प्रवर्तना प्रवर्तकनिष्ठेत्यवसीयते । प्रवर्तनैव लिङर्थः इति भाष्येण स्पष्टं प्रतीमः । इष्टसाधनत्वं न प्रवर्तकपुरुषे वर्तते । अपि तु धात्वर्थे यागपाकादौ । नापीष्टसाधनत्वबोधः प्रवर्तकपुरुषवृत्तिः । तस्य श्रोतृनिष्ठत्वात् । तस्मान्नेष्टसाधनत्वं लिङर्थः प्रवर्तना । न चेष्टसाधनताज्ञापनं प्रवर्तकपुरुषनिष्ठमिति वाच्यम् । तावता तस्यैव प्रवर्तनात्वं संभवति न भवदभिमतेष्टसाधनत्वस्य । इष्टसाधनत्वातिरिक्तमेव हि इष्टसाधनताज्ञापनम् । प्रवर्तनारूममिष्टसाधनताज्ञापनमेव लिङर्थः इत्यभिधाने च अस्मदभिमत एवार्थः प्रकारान्तरेणोक्तो भवति । इष्टसाधनताज्ञापनं नाम इष्टसाधनताज्ञानानुकूलो व्यापारः । स च लिङन्तशब्दरूप एव । तस्य चेष्टसाधनतानुकूलत्वं अनुपदं वक्ष्यते ।

अपि च यथा पाकः इष्टसाधनमिति ज्ञानं प्रवृत्तौ हेतुः एवं साध्येष्टकः पाकः इति ज्ञानमपि । तदृज्ञानादिव निरुक्तज्ञानादपि प्रवृत्तेरनुभवसिद्धत्वात् । तथा च विनिगमनाविरहात् इष्टसाधनत्वे इव साध्येष्टकत्वेऽपि लिङः शक्तिकल्पनया गौरवं दुर्वारम् । न च साधनत्वमखण्डोपाधिः साध्यत्वञ्च साधनघटितं गुरुभूतमिति कारणतावच्छेदकगौरवात् साध्येष्टकत्वज्ञानस्य न कारणता अपि तु इष्टसाधनता-

ज्ञानस्यैवेति इष्टसाधनत्वमेव लिङर्थः इति वाच्यम् । साधनत्वस्येव साध्यत्वस्याप्यखण्डस्य संभवात् साध्येष्टकत्वज्ञानस्य कारणत्वे कारणतावच्छेदकगौरवाभावात् विनिगमनाविरहस्तदवस्थ एव । एवमेव कृतिसाध्यत्वस्यापि लिङर्थता दूषणीया । कृतिसाध्यत्वज्ञानस्येव कृतिसाधनकत्वज्ञानस्यापि कारणत्वात् विनिगमनाविरहेण कृतिसाधनकत्वेऽपि शक्तिकल्पनागौरवमिति ।

हेतुमति चेति सूत्रे भाष्ये पृच्छतु मां भवानित्यत्र णिच् कस्मान्न भवति इति प्रश्नः उपक्षिप्तः । णिच्प्रयोगनिमित्तस्य कर्तृप्रयोजकव्यापारस्य लोडन्तशब्दप्रयोगरूपस्य सत्त्वादिति प्रश्नाशयः । अस्योत्तरं 'अकर्तृत्वात्' इति भाष्येणाभिहितम् । धात्वर्थक्रियाविशिष्टस्य प्रेरणायां णिच् भवति । निष्क्रियप्रेरणायां लिङ्लोडादिकं भवति । एवञ्चात्र प्रश्नादिधात्वर्थव्यापारविशिष्टप्रयोजकव्यापाराभावान्न णिचः प्रवृत्तिरिति तदाशयः । तदुपरि 'अथापि कथञ्चित्कर्ता स्यात् एवमपि न दोषः लोटोक्तत्वात् णिच् न भविष्यति' इति समाधानान्तरमुक्तं भाष्ये । णिजर्थस्य विध्यर्थकेन लोटा उक्तत्वात् उक्तार्थानामप्रयोगः इति न्यायेन णिच् न भवतीति तदर्थः । न हि इष्टसाधनत्वं णिजर्थः इति कश्चिदप्यभ्युपैति । इष्टसाधनत्वस्य विधित्वे एतद्भाष्यासङ्गतिः स्पष्टं प्रतीयते । तस्मान्नेष्टसाधनत्वं विधिः । अपि तु लिङाद्यन्तशब्दरूपा प्रेरणा । सा च विषयतया धात्वर्थे अन्वेति । एवञ्च पचेत् इत्यादौ प्रेरणाविषयः पाकः इति शाब्दबोधो जायते ।

ततः दोषाभावविशिष्टया आप्तोक्तया प्रेरणया विषयतया स्वविषये पाकादौ इष्टसाधनत्वमनुमीयते । विना इष्टसाधनताज्ञानं पुरुषप्रवृत्तेरनुदयात् । तथा च

भाष्यम् 'सर्वे इमे स्वभूत्यर्थं प्रवर्तन्ते'। इति। अत्र हेतुकोटौ आप्तत्वानुपादाने इष्टसाधनत्वरूपसाध्याभाववति विषभक्षणे शत्रुप्रोक्त विषं भुंक्ष्वेति वाक्यघटकलिङर्थ-प्रेरणाविषयत्वसत्त्वेन व्यभिचारः अतः आप्तेत्युक्तम्। आप्तत्वञ्च भ्रमादिदोषरहितत्वे सति तत्तत्क्रियाविषये स्वेष्टप्रतिबन्धानिष्टोत्पत्त्युभयानुकूलव्यापाराभाववत्त्वम्। क्रुद्धे-नोक्तात् मृदं भुंक्ष्वेति वाक्यान्मृद्भक्षणे, सेर्ष्येणोक्तात् पायसं भुंक्ष्व इति वाक्याच्च पायसभक्षणे इष्टसाधनत्वाक्षेपो नास्ति। एवञ्चेष्टासाधने मृद्भक्षणादौ प्रेरणाविषयत्व-सत्त्वेऽपि न व्यभिचारः। प्रयोक्तुः क्रोधासूयादिदोषवत्त्वेन दोषरहितत्वघटिताप्तत्वा-भावेन तदुक्तप्रेरणाविषयत्वहेतोस्तत्रासत्त्वात्। यत्र आप्तेन गृहविशेषे भोजनं अत्यन्तानिष्टसाधनमिति बोधनाय विषं भुंक्ष्व मा चास्य गृहे भुंक्थाः इत्युक्तं तत्र न विषभक्षणे इष्टसाधनत्वाक्षेपः न वा श्रोता तत्र प्रवर्तते। इत्थञ्च इष्टसाधनत्वाभाववति विषभक्षणे आप्तोक्तप्रेरणाविषयत्वसत्त्वेन व्यभिचारः इति दोषाभावविशिष्टत्वं प्रेरणायां विशेषणमुपात्तम्। तत्र अनिष्टसाधनत्वनिश्चयप्रयुक्तद्वेषस्य प्रतिबन्धकस्य सत्त्वेन दोषाभाववैशिष्ट्यघटितहेतोस्तत्राभावान्न व्यभिचारः।

एवञ्च पचेदित्यादौ पचिना पाकत्वेनोपस्थिते भाविपाके पक्षे निरुक्तप्रेरणा-विषयत्वेन हेतुना इष्टसाधनत्वमनुमाय पाके प्रवर्तते। बहुलायाससाध्ये यागादौ तु सामान्यतः इष्टसाधनताज्ञानं न प्रवर्तकं अपि तु विशिष्य स्वर्गत्वादिना स्वर्गादि-साधनताज्ञानम्। यजेतेत्यादिवैदिकप्रेरणाविषयत्वे स्वर्गसाधनताव्याप्तिज्ञानं उपदेशेन शाब्दबोधरूपमुत्पद्यते। ततश्च स्वर्गसाधनत्वानुमानाद्यागादौ प्रवर्तते पुरुषः। प्रथमोपदेष्टुः पुरुषस्य तादृशं व्याप्तिज्ञानं योगाज्जायते। न च ज्योतिष्टोमादिव

वाजपेयगङ्गास्नानादितोऽपि स्वर्गो जायते । वाजपेयादिजन्यस्वर्गसाधारणस्य च स्वर्गत्वस्य ज्योतिष्टोमकार्यतातिप्रसक्तस्य तत्कार्यतावच्छेदकत्वं न संभवतीति कथं ज्योतिष्टोमादौ स्वर्गसाधनत्वग्रहः इति वाच्यम्। वाजपेयादिना स्वर्गोत्पत्तिबोधक-वाक्यान्तरपर्यालोचनवान् पुरुषः प्रेरणाविषयत्वेन विजातीयस्वर्गसाधनत्वमेवानुमिनोति । वैजात्यञ्चानतिप्रसक्तं कार्यतावच्छेदकं संभवति । ध्वनितश्चायमर्थः 'न चान्तरेण यार्जि यजिफलं लभन्ते' इति भाष्येण । अहरहः सन्ध्यामुपासीत इत्यादिनित्यकर्मविधायक-वाक्यघटकलिङर्थप्रेरणया प्रत्यवायाभावरूपेष्टसाधनत्वमिव अवश्यकर्तव्यत्वमप्याक्षिप्यते । ततश्च तदकरणे प्रत्यवायः सिद्ध्यति ।

न कलञ्जं भक्षयेदित्यत्र आरोपितं कलञ्जभक्षणं प्रेरणाविषयः इति शाब्दबोधः नञा आरोपितत्वद्योतनात् । प्रतियोग्यारोपस्याभावबुद्धौ हेतुत्वात्तदनन्तरं कलञ्जभक्षणा-भावः प्रेरणाविषयः इति मानसं ज्ञानमुत्पद्यते। न चेदमेव शाब्दबोधरूपमिति शङ्क्यम् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमविरोधेन लिङर्थप्रेरणायाः तदप्रकृत्यर्थेनाभावेनान्वयायोगात् । ततः यदभावत्वेन यदभावः प्रेरणाविषयतया बोध्यते तत्प्रतियोगी बलवदिष्टाधिकानिष्टसाधनमिति व्याप्तेः प्रेरणाविषयतया बोधिताभावप्रतियोगिनि कलञ्जभक्षणे अनिष्टसाधनत्वमनुमिनोति । ततश्च निवर्तते कलञ्जभक्षणात् ।

तत्तु समन्वयादिति सूत्रे भाष्ये 'न ब्राह्मणं हन्यादित्यादौ हन्त्यर्थानुरागी नञ् । नञश्चैष स्वभावः यत्स्वसंबन्धिनः अभावबोधनम् । निषेध्याभावबुद्धिश्च निषेध्यविषयौ-दासीन्ये कारणम्' इति वदतां शङ्करभगवत्पादानामपि अयमेव निषेधवाक्यार्थः अभिमतः इति प्रतीमः । अनेन हि भाष्येण धात्वर्थाभावे लिङर्थप्रेरणाविषयतेति

लभ्यते । यत्त्वत्र वाचस्पतिमिश्राणां निषेध्ये अनिष्टसाधनताबुद्धिरेव निषेध्याभावबुद्धिरिति व्याख्यानम् तन्न सङ्गतं अक्षरास्वारस्यात् । न हि निषेध्याभावबुद्धिपदेन निषेध्ये अनिष्टसाधनताबुद्धिरिति स्वरसतः प्रतीयते । निषेध्याभावस्य प्रेरणाविषयत्वेन बुद्धिः निषेध्यविषयौदासीन्ये कारणमित्यस्मद्व्याख्यानन्तु अक्षरानुगुण्यं भजते । किञ्च अनिष्टसाधनत्वमित्यनेन मिश्रैः यदि इष्टसाधनत्वाभावो विवक्षितः तदा तस्य धात्वर्थे हननादौ बाधः । यदि चानिष्टजनकत्वं विवक्षितं तदा नञः लिङर्थानुरागः तदर्थैकदेशानुरागो वा प्राप्तः न तु हन्त्यर्थानुरागः इति 'हन्त्यर्थानुरागी नञ्' इति भाष्यं विरुद्ध्येत । [1]भावन्तु बादरायणोऽस्ति हि इति सूत्रे भाष्ये न सुरां पिबेत् इति वाक्ये नञ्वति पदत्रयसंबन्धात् सुरापानप्रतिषेध एव गम्यते इति प्रत्यपादयन् आचार्याः न तु विध्यर्थप्रतिषेधो गम्यते इति । तस्मान्निषेधवाक्यानामस्मदुक्तार्थ एवाचार्यसंमत इति स एव युज्यते ।

---

[1] मुद्रितलघुमञ्जूषाग्रन्थे (९८० पृष्ठे) 'आवृत्तावप्यविरोधः इति सूत्रेऽपि भाष्ये न सुरां पिबेत् इति वाक्ये नञ्वति पदत्रयसंबन्धात्सुरापानप्रतिषेध एव गम्यते न तु विध्यर्थप्रतिषेधः इत्युक्तम्' इति पाठः उपलभ्यते । पदत्रयसंबन्धादित्यादि वाक्यं 'समाननामरूपत्वाच्चावृत्तावप्यविरोधः' इति सूत्रभाष्ये नोपलभ्यते । अपि तु 'भावन्तु बादरायणोऽस्ति हि' इति सूत्रभाष्ये । अतः 'आवृत्तावप्यविरोधः' इति सूत्रे इत्युक्तिः तदनन्तरसूत्रद्वयान्तरिते भावन्तु इत्यादिसूत्रे इत्येवंपरतया व्याख्येया । किञ्च, भावन्त्विति सूत्रभाष्येऽपि 'न सुरां पिबेदिति नञ्वति वाक्ये पदत्रयसंबन्धात्सुरापानप्रतिषेध एवैकोऽर्थोऽवगम्यते । न पुनः सुरां पिबेदिति पदद्वयसंबन्धात्सुरापानविधिरपि' इति वचनजातं दृश्यते । न तु न तु विध्यर्थप्रतिषेधः इत्यपि । तस्मात् सुरापानप्रतिषेधः इत्युक्तं न तु विध्यर्थप्रतिषेधः इत्युक्तम् इति मञ्जूषापाठः समीचीनः । विध्यर्थप्रतिषेधः इत्यनुक्त्वा सुरापानप्रतिषेधः इत्याचार्याणामुक्तिः स्वपक्षसाधिकेति नागेशभट्टानामाशयः ॥

इत्थञ्च लिङन्तशब्दप्रयोगरूपा प्रयुज्यमानलिङन्तशब्दरूपा वा प्रेरणा लिङो वाच्येति प्रतिपादयन्ति ।

प्राचीना वैयाकरणाः, विधिनिमन्त्रणेत्यादिसूत्रात् विध्यादयः लिङोऽर्थाः । विधिः प्रवर्तनम् अप्रवृत्तप्रयोज्यस्य अज्ञातस्वाभिलषितोपाये इष्टसाधनताबोधनम् । निमन्त्रणं आवश्यके श्राद्धभोजनादौ दौहित्रादेरिष्टसाधनताबोधनम् । आमन्त्रणं स्वाभिलषिते कामचारेण प्रवृत्तस्य इष्टसाधनताबोधनम् । यथा इहासीतेति । अधीष्टं संमानपूर्वकं अध्यापनादौ इष्टसाधनताबोधनम् । एतच्चतुष्टयानुगतं प्रवर्तनात्वमिति तदेव लिङः शक्यतावच्छेदकम् । प्रवर्तनायां लिङिति निष्कर्षः । यदाहुः 'अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि । तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥ न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा । विध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥ इति ।

प्रवर्तनारूपं - प्रवर्तनात्वम् । भेदस्य - तत्तद्रूपेण पार्थक्यस्य । प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् । इष्टसाधनत्वावच्छिन्नपाकविषयकज्ञानस्य पाकप्रवृत्तौ कारणत्वात् तत्त्वमिष्टसाधनत्वे वर्तते इति इष्टसाधनत्वं लिङः शक्यमिति फलितम् ।

कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे भामत्यां शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् इति जैमिनिसूत्रं 'शास्त्रफलं स्वर्गादि प्रयोक्तरि कर्तरि । कुतः ? प्रयोक्तृफलसाधनतालक्षणत्वाच्छास्त्रस्य विधेः । कर्त्रपेक्षितोपायता हि विधिः' इति

व्याचक्षणाः वाचस्पतिमिश्राः कण्ठरवेणैव इष्टसाधनत्वस्य लिङर्थविधिरूपतां निरूपयन्ति । मण्डनमिश्रा अप्याहुः —

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम् ॥ इति ।

न च कृतिसाध्यत्वज्ञानस्यापि प्रवृत्तौ हेतुतया तद्विषयस्य कृतिसाध्यत्वस्यापि निरुक्तं प्रवर्तनात्वमस्तीति तदपि लिङर्थः स्यादिति वाच्यम् । कृतिसाध्यत्वे लिङा बोधितेऽपि न तद्ज्ञानमात्रं प्रवर्तकं अशक्तस्यापि कार्यविशेषे प्रवृत्त्यापत्तेः । किन्तु मदीयकृतिसाध्यताज्ञानम् । मदंशान्तर्भावेण कृतिसाध्यत्वं न लिङा बोधयितुं शक्यते । परन्तु यागः मत्कृतिसाध्यः मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात् इत्यनुमानेन तद्ज्ञानं जायते । एवं च तेनैव कृतिसाध्यताज्ञानसंभवेन लिङः तत्र शक्तिकल्पनं न युज्यते । एवं लौकिकप्रमाणादेव कृतिसाध्यताबोधः उपपद्यते । एवं धात्वर्थयागस्य आख्यातार्थे कृतावनुकूलतासंबन्धेनान्वयबोधानन्तरं यागः कृतिसाध्यः इति मानसमपि ज्ञानं संभवति । अतः अन्यलभ्यं कृतिसाध्यत्वं न लिङर्थः अनन्यलभ्यः शब्दार्थः इति न्यायात् । अपि च कृतिसाध्यताज्ञानं न प्रवर्तकम् । कृत्यसाध्ये चन्द्रस्पर्शादौ कुतो न प्रवर्तते इति चेत् । ततः इष्टाभावेन वृथाश्रमजनकत्वेन तत्र द्वेषादेव । अतोऽपि कृतिसाध्यत्वस्य लिङर्थता न स्वीकरणीया ।

न च मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्वारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्यापि तत्र हेतुता वाच्येति बलवदनिष्टाननुबन्धित्वमपि लिङर्थः इति वाच्यम् । तद्ज्ञानस्य

प्रवर्तकत्वे बहुलायाससाध्ये यागादौ प्रवृत्तिर्न स्यात् । ततो बहुतरदुःखानामुत्पत्त्या बलवदनिष्टानुबन्धित्वज्ञानस्यैव सत्त्वात् । एवं अल्पस्यापि दुःखस्य कुतश्चिद्दुःखाद्बल-वत्त्वेन अनुगतं बलवत्त्वमपि दुर्वचम् । तस्मान्न निरुक्तानुबन्धित्वज्ञानं प्रवर्तकम् । अपि च तद्विषयकप्रवृत्तौ तद्विषयकद्वेषस्य प्रतिबन्धकतया तदभावस्य प्रतिबन्धकाभाव-विधया हेतुत्वं क्लृप्तमिति द्वेषाभावेन बलवदनिष्टाननुबन्धित्वज्ञानमन्यथासिद्धं भवति । न च कारणताग्राहकं अन्वयव्यतिरेकसहचारज्ञानम् तच्च द्वेषाभावे इव बलवदनिष्टा-ननुबन्धित्वज्ञानेऽप्यस्ति । तथा च तेनैव द्वेषाभावस्यान्यथासिद्धिः स्यादिति वाच्यम् । परकीयसुन्दरीगमनं नरकमुत्पादयतीति जानन्नपि आस्तिकः तज्जन्यसुखे उत्कटेच्छया तद्गमने प्रवर्तते तत्र द्वेषाभावदशायाम् । न चायं तत्र बलवदनिष्टाननु-बन्धित्वं जानाति । ततः व्यतिरेकव्यभिचारात् तद्ज्ञानं न प्रवृत्तौ हेतुः । अपि तु द्वेषाभाव एव । स चास्त्येव तस्येति न व्यभिचारः । न च द्विष्टसाधनताबुद्धेः द्वेषहेतोः सत्त्वात्कुतो न तस्य तत्र द्वेषः इति वाच्यम् । तत्र द्वेषं प्रति तज्जन्यसुखादौ उत्कटेच्छासामग्रीविरहविशिष्टद्विष्टसाधनताज्ञानस्यैव हेतुतया इच्छासामग्रीसत्त्वे द्वेषहेतोरभावात् । अथवा द्वेषं प्रति तादृशेच्छासामग्री स्वातन्त्र्येण प्रतिबन्धिका । उत्कटत्वं च जातिविशेषः विषयिताविशेषो वा । अतो न तत्र द्वेषः इति द्वेषाभाव एव हेतुः न पुनः बलवदनिष्टाननुबन्धित्वज्ञानमिति न तत् लिङः शक्यम् ।

एतेन, बलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तौ प्रतिबन्धकम् तदभाव एव प्रतिबन्धका-भावविधया हेतुः न तु बलवदनिष्टाननुबन्धित्वज्ञानमिति वदन्तः परास्ताः ।

अगम्यागमनं नरकसाधनत्वेन जानतोऽप्यास्तिककामुकस्य असति द्वेषे तत्र प्रवृत्तेर्जायमानत्वेन तादृशानुबन्धित्वज्ञानस्य प्रतिबन्धकत्वासंभवात् । द्वेषप्रतिबन्धकतयैवोपपत्तौ तद्ज्ञानप्रतिबन्धकतायां मानाभावाच्च ।

यत्तु, यागीयपशुहिंसा न पापं जनयति । न हिंस्यादिति निषेधशास्त्रं रागतः प्राप्तहिंसाविषयतया संकोच्यते इति प्रामाणिकाः मन्यन्ते । 'पशुमालभेत' 'न हिंस्यात्' इति शास्त्रयोर्विरोधे एव शास्त्राप्रामाण्यभिया सामान्यशास्त्रस्य विशेषपरतया संकोचो युज्यते । इष्टसाधनत्वमात्रस्य लिङर्थतायां निषेधशास्त्रेण आलभेतेति विधिर्न विरुध्यते । पश्वालम्भे इष्टसाधनत्वस्य निषेधबोधितानिष्टसाधनत्वस्य च संभवात् परकीयसुन्दरीगमने उभयोः समावेशेन विरोधाभावात् । अतः इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वरूपं बलवदनिष्टाननुबन्धित्वमपि लिङर्थः इति स्वीकरणीयम् । एवञ्च बलवदनिष्टानुबन्धित्वाननुबन्धित्वयोर्विरोधेन तद्बोधकयोः निरुक्तशास्त्रयोर्विरोधे न हिंस्यादिति शास्त्रं विषयविशेषे संकोच्यते इति नैयायिका वदन्ति । तन्न ।

नान्तरीयकत्वस्य दुर्वचत्वेन तद्घटितस्य बलवदनिष्टाननुबन्धित्वस्य लिङर्थत्वासंभवात् । इष्टजनकजन्यत्वं इष्टोत्पत्तिनान्तरीयकत्वमिति चेन्न । ब्रह्महननादिजन्यनरकस्यापि इष्टजनकतादृशहननजन्यत्वेन नान्तरीयकत्वापत्त्या तदतिरिक्तदुःखजनकत्वाभावेन न ब्राह्मणं हन्यादित्यादिनिषेधानुपपत्तिः । इष्टव्याप्यत्वं तदिति चेन्न । यदि व्याप्यत्वं कालिकं तदा यागादेरपि न निरुक्ताननुबन्धित्वं संभवति । आन्तरालिकदुःखस्यापि इष्टस्वर्गसमानकालिकत्वाभावेन इष्टोत्पत्तिनान्तरीयकातिरिक्तत्वात् ।

यदि दैशिकं व्याप्यत्वं विवक्षितं तदा ब्राह्मणहननादिजन्यनरकस्यापि इष्टोत्पत्त्यधिकरणे एव जायमानत्वेन इष्टव्याप्यत्वात् इष्टोत्पत्तिनान्तरीयकत्वात्तदतिरिक्तदुःखजनकत्वस्य ब्राह्मणहनने बाधात् तेषां निषेधानुपपत्तिः। इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखाजनकमित्यनेन बलवद्द्वेषविषयदुःखाजनकत्वमेव विवक्षितमिति न दोषः इति चेन्न। रागिणः कलञ्जभक्षणजन्ये नरके बलवद्द्वेषानुदयेन तत्पुरुषीयबलवद्द्वेषविषयदुःखाजनके तद्भक्षणे निरुक्तदुःखाजनकत्वाभावो बाधितः इति न कलञ्जं भक्षयेदिति निषेधानुपपत्तिस्तदवस्था। नरकाजनकत्वमेव निरुक्तानुबन्धित्वमित्यनेन विवक्षितमिति चेन्न। लिङर्थाभावस्य नरकजनकत्वस्य कलञ्जभक्षणादौ सत्त्वेन न कलञ्जं भक्षयेत् इत्यादीनामुपपत्तावपि ज्वरितः न भुञ्जीत इति निषेधानुपपत्तिः नरकजनकत्वस्य भोजने बाधात्। तस्मात् दुर्वचं बलवदनिष्टाननुबन्धित्वं न लिङर्थः।

अपि च तस्य लिङर्थत्वेऽपि न हिंस्यादिति निषेधस्य संकोचो न लभ्यते। यथा भवन्मते लिङर्थस्यापि तस्य श्येनेनाभिचरन् यजेतेत्यत्र धात्वर्थे नान्वयः स्वीक्रियते तस्य बलवदनिष्टानुबन्धित्वात्। तथा लिङर्थस्यापि बलवदनिष्टाननुबन्धित्वस्य आलम्भे धात्वर्थे अबोधनेऽपि इष्टसाधनताबोधनेन पशुमालभेत इति विधेरुपपत्तेः। न च तत्र लिङर्थैकदेशबाधो दुर्वारः इति वाच्यम्। निषेधशास्त्रस्य यागीयपश्वालम्भादौ सर्वथा अप्रवृत्तिरूपात् बाधात् अस्य न्यूनत्वात्। ततश्च निषेधशास्त्रसङ्कोचलाभाय बलवदनिष्टाननुबन्धित्वं लिङर्थ इति वचनं नोपपद्यते।

—To be continued.

EXCHANGE LIST

The Servant of India Society.
Hindustan Review.
Half-Yearly Journal of the Mysore University.
Economica, London.
Philosophical Quarterly.
Journal of the Indian Chemical Society.
Reading University Gazette.
Mysore Economic Journal.
Chemical Abstracts, Easton P. A.
The Punjab University Gazette.
Journal of the Bombay University.
Quarterly Journal of the Mythic Society.
Publications by the Oriental Library, Baroda.
Publications by the Kungl Universities Bibliotek, Uppasala, Sweden.
Publications by Tohoku Imperial University, Sendai, Japan.
Journal of the Madras University.
Bulletin de L'Ecole Francaise d'Extreme-Orient — Ecole Francaise d'Extreme-Orient, Hanoi (Indo-China).
Djwa—Java-institute, Kweekschoollaan, Jogajkarta, Java.
Varendra Research Society, Rajshahi, Bengal — Annual Report and Monographs.
Quarterly Journal of the Kannada Literary Academy.
Journal of the Andhra Historical Research Society.
Indian Culture.
Scripta Mathematica.
Indian Historical Quarterly, Calcutta.
Publications of the Bombay Royal Asiatic Society.
The Indian Library Journal.
Review of Philosophy and Religion.
U. S. S. R. Society for Cultural relations with foreign countries, Russia.
'*Drama*' published by the British Drama League, London.
Proceedings of the Durham Philosophical Society, Newcastle.
Collected papers from the Faculty of Science, Osaka.

EXCHANGE LIST—(Cont.)

Bulletin of the Calcutta Mathematical Society.

Science and Culture. Calcutta.

Indian Co-operative Review, Madras.

Epigraphica Indica.

Spolia Zeylanica.

Publications of the R. Swedish Academy of Sciences, Stockholm.

Bijendragen Tet De Taal, Land-En Volken Kunde Van Nederland Sch-Indie-s-Gravenhage.

Monthly Weather Report, Poona.

Scientific Reports of the Imperial Institute of Agricultural Research.

The Aryan Path.

The Mimamsa Prakash.

Indiana.

Vishwa Vani—A Journal of Indian Renaissance.

Journal of the Madras Geographical Association.

Man in India.

The Poona Orientalist.

Publications by the Industrial Intelligence and Research Bureau, Simla.

The Mathematical Teacher, New York.

Duke Mathematical Journal.

Publications of the Brown University, U. S. A.

Transactions of Tbilissian Mathematical Institute, Russia.

Lingnan Science Journal.

London University Gazette.

The Adyar Library Bulletin.

ANNAMALAI UNIVERSITY PUBLICATIONS

	Name of Publication		*Author*	Rs.	A.	P.
	History					
1	Bhoja Raja	..	Prof. P. T. Srinivasa Ayyangar	1	8	0
2	The Nayaks of Tanjore (Sold out)	..	Rao Bahadur C.S. Srinivasachariar and Mr. Vridhagirisan	4	8	0
3	History of Gingee	..	Rao Bahadur C.S. Srinivasachariar	4	0	0
4	Indian History in Tamil	..	Rao Bahadur C.S. Srinivasachariar and S. K. Govindaswami	2	8	0
5	Dutch in Malabar	..	Dr. P. C. Alexander	3	8	0
	Economics					
6	Factory Labour in India	..	Prof. A. Mukhtar	3	0	0
7	The Distributive Co-operation in India	..	Mr. V. G. Ramakrishna Ayyar	1	0	0
8	The Madras Agriculturists' Relief Act—A study	..	Dr. B. V. Narayanaswami Nayudu and P. Vaidyanathan, M.. .			
9	Report on the Working of Prohibition in Salem	..	C. Jaganathachari, M. A., M. Litt.			
10	Madras Sales Tax Act	..	Dr. B. V. Narayanaswami Nayudu and S. Thiruvengadathan	1	8	0
11	Road and Rail Transport (Sold out)	..	Dr. B. V. Narayanaswami Nayudu and S. R. N. Badri Rao	5	0	0
12	Ground Nut	..	Dr. B. V. Narayanaswami Nayudu and P. S. Hariharan	1	8	0
13	Economy of the South Indian Temple	..	Mr. V. G. Ramakrishna Ayyar	2	0	0
14	Text-book on Economics in Tamil	..	Mr. V. G. Ramakrishna Ayyar	2	0	0
15	The Indian Trade (not in stock)	..	Dr. B. V. Narayanaswami Nayudu	2	0	0
	Philosophy					
16	Naveena Tarkam in Tamil (not in stock)	..	Mr. K. R. Applachariar	2	0	0
17	Educational Psychology in Tamil (not in stock)	..	Prof. K. R. Applachariar and Prof. R. Ramanujachari	1	0	0
	Physics					
18	A Text-book in Tamil on Physics Vol. I	..	Mr. R. K. Visvanathan	3	0	0
19	Do. Vol. II	..	Do.	2	0	0
20	Acoustics (in Tamil)	..	Do.	1	8	0
21	Physics of Music	..	Do.	2	0	0
	Chemistry					
22	A Text-book in Tamil on Chemistry, Vol. I	..	Mr. N. Ananthavaidyanathan	3	0	0
23	Do. Vol. II	..	Do.	2	8	0

	Name of Publication	*Author*	Rs.	A.	P.
24	Practical Chemistry for Intermediate Students ..	Mr. M. L. Sitaraman	2	8	0
	Botany				
25	A Text-book in Tamil on Botany (not in stock) ..	Dr. T. S. Raghavan	3	0	0
26	Cytalogical Studies in bignoniacea ..	Mr. K. R. Venkatasubban, M. SC.	5	0	0
	Tamil				
27	Pari Pattu (not in stock) ..	Bhasha Kavisekara Vidvan R. Raghava Ayyangar	2	0	0
28	Kurunthogai Vilakkam	Do.	1	8	0
29	History of Tamil Literature (not in stock) ..	Do.	3	0	0
30	Advanced Studies in Tamil Prosody ..	Dr A. Chidambaranatha Chettiar	2	0	0
	Sanskrit				
31	Text and Commentary of Tattvavibhavana by Parameswaran, a commentary on Vacaspati Misra's Tattvabindu ..	Mr. V. A. Ramaswami Sastriar	3	0	0
32	Jagannatha Panditha ..	Do.	2	0	0
33	Sri Mukundamala (not in stock) ..	Prof. K. Rama Pisharoti	3	0	0
34	Svarasidhanta Chandrika ..	Srinivasayajvan Edited by Mr. K. A. Sivaramakrishna Sastri	5	0	0
35	Trimsacchloki ..	Sri V. Subramanya Sastri	0	8	0
36	Nyayakulisa ..	Edited by Prof. R. Ramanujachari and Pandit K. Srinivasacharya	2	8	0
37	Nitimala	Do.	2	0	0
38	Vivarana ..	V. Subramania Sastri	6	0	0
39	Philosophy of Aesthetic Pleasure (not in stock) ..	P. Panchapagesa Sastri	3	0	0
40	Lectures on Patanjali's Mahabashya ..	Dr. P. S. Subramanya Sastri	3	0	0
41	History of Sanskrit Literature	Do.	10	0	0
42	Studies in Sanskrit Texts on Temple Architecture ..	Sri N. V. Mallaya.			
	General				
43	The University Journal ..	Editor Annual Subscription Rs. 7 (Inland) 10's (Foreign)			
44	Raja Sir Annamalai Chettiar's Commemoration Volume		10	0	0

Name of Publication	*Author*	Rs. A. P.
Music		
45 Swaramelakalanidhi ..	Mr. M. S. Ramaswami Ayyar	2 0 0
ADDITIONAL PUBLICATIONS		
History		
Maratha Rule in the Carnatic..	Sri C. K. Srinivasan	3 0 0
Tamil		
Tolkappiam Porulathikaram Vol. I Part I ..	Sri E. S. Varadaraja Iyer	3 8 0
Part II ..	Do.	4 8 0
Tree worship & Ophiolatory ..	G. Subramania Pillai, B. A., B. L.	1 8 0
Introduction & History of Saiva Siddhantha ..	Do.	3 0 0
Historical Tamil Reader ..	Dr. P. S. Subramanya Sastri	2 8 0
Tolkappiam-Collatikaram ..	Do.	5 0 0
Endowment Publications		
Kambar Memorial Prize Selections ..		
Adi Kumarakuruparar ..		
Sekkilar Selections ..		
Tevara Tirumurai Preliminary..		
Tamil Isai Music Series		
Volume I (sold out) ..		2 0 0
,, II ,, ..		3 0 0
,, III ,, ..		2 0 0
,, IV ,, ..		2 0 0
,, V Part 1 ,, ..		1 8 0
,, Part 2 ..		1 4 0
,, Part 3 ..		1 0 0
,, VI ..		3 0 0
,, VII ..		2 0 0
,, VIII ..		3 0 0
,, IX ..		3 0 0
,, X ..		3 0 0
,, XI ..		3 0 0
,, XII ..		3 8 0
,, XIII ..		3 0 0
,, XV ..		3 0 0
,, XVI ..		3 0 0
,, XVII ..		3 0 0
Mathalam Karkum Murai ..		1 6 0

For Copies Apply to:

THE REGISTRAR, Annamalai University, Annamalainagar.

MYSORE ECONOMIC JOURNAL

The only Journal of its kind published regularly on the 7th of each month for over twenty years. Has a number of contributors and reviewers attached to it. Bright and topical in its contents, it has ever stood out for progressive and suggestive comments on public affairs and well being. Sir Roper Lethbridge called it the "Most Admirable Journal". Annual subscription Rs. 6.

From the Book Department, books on economic matters can be always ordered. The following books are available for sale from stock :

PLANNED ECONOMY FOR INDIA by Sri M. Visvesvaraya, K.C.I.E., LL. D. Price Rs. 6.

MADURA SOWRASHTRA COMMUNITY by K. R. R. Sastry, M.A., M.L., F.R. ECON. S. Price Re. 1.

INDIAN CASTE SYSTEM by C. Hayavadana Rao, B.A., B.L., F.R. ECON. S. Price Re. 1.

STUDIES IN RURAL ECONOMICS by S. Kesava Iyengar, M.A. Price Rs. 8.

TOWARDS NATIONAL SELF SUFFICIENCY by Dr. P. J. Thomas, M.A., B. LITT., PH. D. Price As. 4.

MYSORE GAZETTEER (3 VOLS.) Edited by C. Hayavadana Rao, B.A., B.L. Price per set Rs. 20. Can also be had in parts at prices varying from Rs. 2 to Rs. 8 per volume.

Postage extra in all cases

Apply to :—

MANAGER, "Mysore Economic Journal",

No. 19, GUNDOPUNT BUILDINGS SIDDICUTTA,

BANGALORE CITY.

THE INDIAN LIBRARY JOURNAL, BEZWADA.

The Official organ of the All-India Public Library Association. Expounds the various phases of Library Science and the Library Movement in India.

Annual Subscription Rs. 3

RATES OF ADVERTISEMENTS

Particulars	*Per Issue*			*Per Two Issues*		
	Rs.	A.	P.	Rs.	A.	P.
Back Cover	15	0	0	28	0	0
Inside Back Cover	10	0	0	18	0	0
Inside Page	8	0	0	15	0	0
Inside Half Page	4	0	0	8	0	0